१ सामान्यहोमविधिः (अग्निस्थापनविधिः)[१]

श्रीमङ्गलमूर्तये नमः

नमः कर्मात्मने तस्मै ब्रह्मणे जगदात्मने ।
नम आस्याय देवानां वैश्वानरस्वरूपिणे ॥

१. अग्निस्थापनविधिः

पञ्चगव्यप्राशनविधि

जाताऽऽशौचान्ते मृताशौचान्ते तथा उपाकर्मकोटिहोमसप्ताहादिनैमित्तिकशुभकर्मारम्भे च शरीरशुद्ध्यर्थं पञ्चगव्यप्राशनस्यावश्यकत्वादत्र प्रस्तूयते । तद्यथा -

पञ्चगव्यं पवित्रं तु आहरेत्ताम्रभाजने ।

गायत्र्या चैव गोमूत्रं गन्धद्वारेति गोमयम् ॥

आप्यायस्वेति च क्षीरं दधिक्राब्णोति वै दधि ।

तेजोसि शुक्रमित्याज्यं देवस्यत्वा कुशोदकम् ॥ - कृत्यकल्पतरौ

पञ्चगव्यसम्मेलनमन्त्राः -

ॐ तत्सवितु ... ... इत्यनेन गोमूत्रम्,

ॐ गन्धद्वारान्दुराधर्षां नित्यपुष्टां करीषिणीम् ।

ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ इत्यनेन गोमयम् ।

ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् ।

भवा वाजस्य सङ्गथे ॥ इत्यनेन क्षीरम् ।

ॐ दधिक्राब्णोऽ अकारिषञ्जिष्णोरश्वस्य वाजिनः ।

सुरभिनो मुखाकरत्प्रणऽ आयू ँषि तारिषत् ॥ इत्यनेन दधि ।

ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि ।

प्रियं देवाना मना धृष्टन्देवयजनमसि ॥ इत्यनेन आज्यम् ।

ॐ देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।

अग्नये जुष्टं गृह्णाम्यग्नीषोमाभ्याञ्जुष्टं गृह्णामि ॥ इत्यनेन कुशोदकम् ।

ततो गायत्रीमन्त्रेण दशवारं सम्मन्त्र्य प्राशयेदनेन मन्त्रेण -

पञ्चगव्यप्राशनमन्त्रः -

ॐ यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ।

प्राशनात्पञ्चगव्यस्य दहत्वग्निरिवेन्धनम् ॥

(इति पञ्चगव्यप्राशनविधिः)

कर्मपात्रनिर्माणविधिः

आदौ कर्मपात्रं विधाय तत्कुशप्रयोगपूर्वकमेव कर्म कर्तव्यमिति सर्वकर्मादौ कर्मपात्रनिर्माण-विधिः प्रस्तूयते, तद्यथा -

ॐ यद्देवा देवहेडनन्देवासश्चकृमा व्वयम् ।

अग्निर्म्मा तस्मादेनसो व्विश्वान्मुञ्चत्वꣳ हसः ॥

ॐ यदि दिवा यदि नक्तमेनाꣳसि चकृमा व्वयम् ।

वायुर्मा तस्मादेनसो व्विश्वान्मुञ्चत्वꣳ हसः ॥

ॐ यदि जाग्रद्यदि स्वप्नऽएनाꣳसि चकृमा व्वयम् ।

सूर्य्यो मा तस्मादेनसो व्विश्वान्मुञ्चत्वꣳ हसः ॥ इति देवानावाह्य

ॐ पवित्रे स्थो व्वैष्णव्यौ सवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः । देवीरापोऽअग्रेगुवोऽअग्रेपुवोग्रऽइममद्य यज्ञन्नयताग्रे यज्ञपतिꣳसुधातुं यज्ञपतिन्देवयुवम् ॥

इति मन्त्रेण कर्मपात्रे पवित्रं क्षिपेत्

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये । शं योरभिस्स्रवन्तु नः ॥ इति जलम्

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्व्वभूतानां तामिहोपह्वये श्रियम् ॥

इति गन्धम्

ॐ अक्षन्नमीमदन्त ह्यवप्रियाऽअधूषत । अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजान्विन्द्र ते हरी ॥ इति अक्षतान्

ॐ यवोसि यवयास्मद्द्वेषो यवयारातीर्दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा । शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥

इति यवान्

ॐ तिलोऽसि सोमदैवत्यो गोसवो देवनिर्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितॄँल्लोकान् प्रिणाहि नः॥ इति तिलान्

ॐ श्रीश्च ते लक्ष्मीश्चपत्क्न्यावहोरात्रे पाश्र्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्म्ऽइषाण सर्व्वलोकम्म्ऽइषाण॥ इति पुष्पं क्षिपेत्

ततः कुशत्रयसहितं कर्मपात्रोदकमादाय -

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा।

यः स्मरेत्पुण्डरीकाक्षं स बाहयाभ्यन्तरः शुचिः॥

ॐ पुण्डरीकाक्षः पुनातु। ॐ पुण्डरीकाक्षः पुनातु। ॐ पुण्डरीकाक्षः पुनातु।

इति पूजाद्रव्याणि आत्मानञ्च सिञ्चेत्।

॥ इति कर्मपात्रनिर्माणविधिः॥

(क) पञ्च भूसंस्काराः

१. परिसमूहनम् २. उपलेपनम् ३. उल्लेखनम् ४. उद्धरणम् ५. अभ्युक्षणम्

भूरसीति भूमिशोधनम् -

ॐ भूरसि भूमिरस्यदितिरसि व्विश्वधाया व्विश्वस्य भुवनस्य धर्त्री। पृथिवीं यच्छ पृथिवीन्दृ६ंह पृथिवीं मा हि६ंसीः॥

अश्मा च म इति मृत्तिकास्थापनम् -

ॐ अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे व्वनस्पतयश्च मे हिरण्यञ्च मेऽयश्च मे श्यामञ्च मे लोहञ्च मे सीसञ्च मे त्रपु च मे यज्ञेन कल्पन्ताम्॥

एषवस्तोम इति दर्भग्रहणम् -

ॐ एषवस्तोमो मरुतऽइयङ्गीर्म्मान्दार्य्यस्य मान्यस्य कारोः। एषायासीष्ट तन्वे वयां विद्यामेषं वृजनञ्जीरदानुम्॥

यद्देवेति दर्भैः परिसमूहनम् -

ॐ यद्देवा देवहेडनं देवासश्चकृमा व्वयम् । अग्निर्म्मा तस्मादेनसो व्विश्वान् मुञ्चत्वꣳहसः ॥

मानस्तोक इति गोमयेन उपलेपनम् -

ॐ मानस्तोके तनये मानऽआयुषि मानो गोषु मानोऽअश्वेषु रीरिषः । मानो वीरान् रुद्रभामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥

त्वामिद्धीति स्फ्येन स्रुवेण वा उल्लेखनम् -

ॐ त्वामिद्धि हवामहे सातौ व्वाजस्य कारवः । त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्व्वतः ॥

प्रथमा द्वितीयैरित्यादिभिः प्रागग्रमुदक्संस्थं रेखात्रयं खादिरेण हस्तमात्रेण खड्गाकृतिना स्फ्येन स्रुवमूलेन वा कुर्यात् ।

ॐ प्रथमा द्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः सत्येन सत्यं यज्ञेन यज्ञो यजुर्भिर्यजूꣳषि सामभिः सामान्यृग्भिर्ऋचः पुरोनुवाक्याभिः पुरोनुवाक्या याज्ज्याभिर्याज्ज्या व्वषट्कारैर्व्वषट्काराऽआहुतीभिराहुतयो मे कामान्त्समर्द्धयन्तु भूः स्वाहा ॥

ॐ दक्षिणामारोह त्रिष्टुप्त्वावतु बृहत्साम पञ्चदशस्तोमो ग्रीष्मऽऋतुः क्षत्रं द्रविणम् ॥

ॐ प्रतीचीमारोह जगती त्वावतु व्वैरूपꣳसाम सप्तदशस्तोमो वर्षाऽऋतुर्विड् द्रविणम् ॥

ॐ उदीचीमारोहानुष्टुप्त्वावतु व्वैराजꣳसामैकविꣳ शस्तोमः शरदृतुः फलं द्रविणम् ॥

सदसस्पतिमिति अनामिकाङ्गुष्ठाभ्यां यथोल्लिखिताभ्यो रेखाभ्यस्त्रिरुद्धरणम् -

ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिम्मेधा मयासिषꣳस्वाहा ॥

व्रतङ्कृणुतेति वेद्यां स्रुवेणोद्धृतपांसूननामिकाङ्गुष्ठाभ्यामुद्धृत्य तानैशान्यां क्षिपेत् ।

ॐ व्व्रतङ्कृणुत व्व्रतङ्कृणुताग्निर्ब्रह्माग्निर्यज्ञो व्वनस्पतिर्यज्ञियः । दैवीन्धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहसꣳसुतीर्थानो ऽ असद्वशे । ये देवा मनो जाता मनो युजो दक्षक्रतवस्तेनोऽवन्तु ते नः पान्तु तेभ्यः स्वाहा ॥

शन्नोदेवीरिति अभ्युक्षणम् -

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ॥

॥ इति पञ्च भूसंस्काराः ॥

(ख) स्वस्तिवाचनम्

ॐ स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः ।

स्वस्ति पूषाऽअसुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ॥

स्वस्तये वायुमुपब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः ।

बृहस्पतिꣳसर्वगणꣳस्वस्तये स्वस्तयऽआदित्यासो भवन्तु नः ॥

विश्वेदेवा नोऽअद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये ।

देवाऽअवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वꣳहसः ॥

स्वस्ति मित्राव्वरुणा स्वस्ति पथ्ये रेवति ।

स्वस्ति नऽइन्द्रश्चाग्निश्च स्वस्ति नोऽअदिते कृधि ॥

स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव ।

पुनर्ददताघ्नता जानता सङ्गमेमहि ॥

स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं महद्भूतं वायसं देवतानाम् ।

असुरघ्नमिन्द्रसखं समत्सु बृहद्यशो नावमिवारुहेम ॥

अꣳहोमुचमाङ्गिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यम् ।

प्रयतपाणिः शरणं प्रपद्ये स्वस्ति संबाधेष्वभयं नोऽअस्तु ॥

ततः '**आशुः शिशानः**' इति समग्रं पठेत् ।

इति स्वस्तिवाचनमन्त्रान् पठन् रङ्गवल्लीं रचयेत् ।

रङ्गवल्लीनिर्माणम्

उत्तर

पश्चिम

पूर्व

दक्षिण

(ग) पूर्वादिक्रमेण अष्टदिक्षु मध्यभागे च पूजनम् –

पृथिव्याः सधस्थादिति पूर्वे -

ॐ पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदाभराग्निं पुरीष्यमङ्गिरस्वदच्छेमोऽग्निं पुरीष्यमङ्गिरस्वद् भरिष्यामः ॥

अग्निश्चेति दक्षिणे -

ॐ अग्निश्च पृथिवी च सन्नते ते मे सन्नमतामदो वायुश्चान्तरिक्षञ्च सन्नते ते मे सन्नमतामदऽआदित्यश्च द्यौश्च सन्नते ते मे सन्नमतामदऽआपश्च व्वरुणश्च सन्नते ते मे सन्नमतामदः । सप्त सᳬंसदोऽअष्टमी भूतसाधनी सकामाँ२ ऽ अध्वनस्कुरु संज्ञानमस्तु मेऽमुना ॥

वायो ये त इति पश्चिमे -

ॐ वायो ये ते सहस्रिणो रथासस्तेभिरागहि । नियुत्वान्त्सोमपीतये ॥

सोमो धेनुमित्युत्तरे -

ॐ सोमो धेनुᳬंसोमोऽअर्वन्तमाशुᳬंसोमो व्वीरङ्कर्मण्यन्ददाति । सादन्यं व्विदथ्यᳬंसभेयं पितृश्रवणं यो ददाशदस्मै ॥

अग्निन्दूतमित्याग्नेय्याम् -

ॐ अग्निन्दूतं पुरोदधे हव्यवाहमुपब्रुवे । देवाँऽआसादयादिह ॥

कयानश्चित्र इति नैर्ऋत्याम् -

ॐ कयानश्चित्रऽआभुवदूती सदावृधः सखा । कया शचिष्ठया व्वृता ॥

वायुरनिलमिति वायव्याम् -

ॐ व्वायुरनिलममृतमथेदं भस्मान्तᳬंशरीरम् । ओ३म् क्रतो स्मर क्लीबे स्मर कृतᳬंस्मर ॥

ईशावास्यमित्यैशान्याम् -

ॐ ईशावास्यमिदꣳसर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥

ततस्तिसृभिर्मध्ये पूजनम् -

ॐ सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ२ऽअजस्रम् । तस्य पूषा प्रसवे याति विद्वान्त्संपश्यन् विश्वा भुवनानि गोपाः ॥

ॐ प्रजापते नत्वदेतान्यन्यो व्विश्वा रूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नोऽअस्तु व्वयꣳस्याम पतयो रयीणाम् ॥

ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिम्मेधामयासिषꣳस्वाहा ॥

(घ) इन्धनशोधनं स्थापनञ्च

कस्त्वा सत्य इतीन्धनं शोधयेत् -

ॐ कस्त्वा सत्यो मदानाम्मꣳहिष्ठो मत्सदन्धसः । दृढा चिदारुजे वसु ॥

त्वामिद्धीति दारुकं स्थापयेत्[२] -

ॐ त्वामिद्धि हवामहे सातौ व्वाजस्य कारवः । त्वां व्वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥

(ङ) अग्नेः संस्कारः स्थापनञ्च –

कांस्यपात्रे निहितं कांस्यपात्रेणैव पिहितमग्निं स्थण्डिलादाग्नेयभागे निधाय क्रव्यादांशं नैर्ऋत्यदिशि क्षिपेत् - **ॐ क्रव्यादाय नमः** । ततः स्थण्डिलेऽग्निं पश्चादानीय,

अग्नावग्निरित्यग्निं शोधयेत् -

ॐ अग्नावग्निश्चरति प्रविष्टऽऋषीणां पुत्रोऽअभि शस्तिपावा । स नः स्योनः सुयजा यजेह देवेभ्यो हव्यꣳसदमप्रयुच्छन्त्स्वाहा ॥

---

२ समित्स्थापनप्रकारः- पञ्च त्रीणि तथा त्रीणि पुनः पञ्च विधानतः । दारुकं स्थापयित्वा च योनिमुपरि कारयेत् ॥

मयि गृह्णामीति कांस्यपात्रे निहितं तेनैव पिहितमग्निं गृह्णाति -

ॐ मयि गृह्णाम्यग्रेऽअग्निꣳरायस्पोषाय सुप्रजास्त्वाय सुवीर्य्याय । मामु देवताः सचन्ताम् ॥

गर्ब्भोऽस्योषधीनामिति गर्भाधानम् -

ॐ गर्ब्भोऽअस्योषधीनां गर्ब्भो व्वनस्पतीनाम् । गर्ब्भो व्विश्वस्यभूतस्याग्ने गर्ब्भोऽअपामसि ॥

इत्यस्याग्नेर्गर्भाधानं करोमि ।

विवस्वन्नादित्य इति पुंसवनम् -

ॐ व्विवस्वन्नादित्यैषते सोमपीथस्तस्मिन्मत्स्व । श्रदस्मै नरो व्वचसे दधातन यदाशीर्द्दा दम्पती व्वाममश्नुतः । पुमान्पुत्रो जायते व्विन्दते व्वस्वधा व्विश्वाहारपऽएधते गृहे ॥

इत्यस्याग्नेः पुंसवनं करोमि ।

अजीजनोहीति सीमन्तोन्नयनम् -

ॐ अजीजनो हि पवमानसूर्य्यं व्विधारे शक्मना पयः । गोजीरयारꣳहमाणः पुरन्ध्या ॥

इत्यस्याग्नेः सीमन्तोन्नयनं करोमि ।

एजतु दशमास्य इति जातकर्म -

ॐ एजतु दशमास्यो गर्ब्भो जरायुणा सह । यथायँ व्वायुरेजति यथा समुद्रऽएजति । एवायन्दशमास्योऽअस्रज्जरायुणा सह ॥

इत्यस्याग्नेर्जातकर्म करोमि ।

(अत्र पिहितकांस्यपात्रस्योद्घाटनम्)

यदा पिपेषेति नामकरणम् -

ॐ यदा पिपेष मातरम्पुत्रः प्रमुदितो धयन् । एतत्तदग्नेऽअनृणो भवाम्यहतौ पितरौ मया । सम्पृचस्थ सम्मा भद्रेण पृङ्क्त विपृचस्थ व्विमा पाप्मना पृङ्क्त ॥

इत्यस्याग्नेर्नामकरणं करोमि ।

पूषा पञ्चाक्षरेणेति निष्क्रमणम् -

ॐ पूषा पञ्चाक्षरेण पञ्चदिशऽउदजयत्ताऽउज्जेषꣳसविता षडक्षरेण षड्तूनुदजयत्तानुज्जेषं मरुतः सप्ताक्षरेण सप्तग्राम्यान् पशूनुदजयँस्तानुज्जेषं बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत्तामुज्जेषम्मित्रो नवाक्षरेण ॥

इत्यस्याग्नेर्निष्क्रमणं करोमि ।

अन्नपतेऽन्नस्येति अन्नप्राशनम् -

ॐ अन्नपतेऽन्नस्यनो देह्यनमीवस्य शुष्मिणः । प्रप्रदातारन्तारिषऽऊर्जन्नो धेहि द्विपदे चतुष्पदे ॥

इत्यस्याग्नेरन्नप्राशनं करोमि ।

अग्नऽआयाहीति चूडाकरणम् -

ॐ अग्नऽआयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि ॥

इत्यस्याग्नेश्चूडाकरणं करोमि ।

भद्रङ्कर्णेभिरिति कर्णवेधः -

ॐ भद्रङ्कर्ण्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।

स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥

इत्यस्याग्नेः कर्णवेधं करोमि ।

अग्निरेकाक्षरेणेति उपनयनम् -

ॐ अग्निरेकाक्षरेण प्राणमुदजयत्तामुज्जेषमश्विनौ द्व्यक्षरेण द्विपदो मनुष्यानुदजयत्ता-नुज्जेषँ विष्णुस्त्र्यक्षरेण त्रीँल्लोकानुदजयत्तानुज्जेषꣳसोमश्चतुरक्षरेण चतुष्पदः पशूनुदजयत्ता-नुज्जेषम्पूषापञ्चाक्षरेण ॥

इत्यस्याग्नेरुपनयनं करोमि ।

ततो सव्याहृतिकां गायत्रीं श्रावयेत् -

ॐ भूर्भुवः स्वः व्वैश्वानराय विद्महे सप्तजिह्वाय धीमहि । तन्नो ऽअग्निः प्रचोदयात् ॥

इत्यग्निं गायत्रीं श्रावयामि ।

व्रतङ्कृणुतेति समावर्तनम् -

ॐ व्व्रतङ्कृणुत व्व्रतङ्कृणुताग्निर्ब्रह्माग्निर्यज्ञो व्वनस्पतिर्यज्ञियः । दैवीन्धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहसꣳसुतीर्थानो ऽ असद्वशे । ये देवा मनो जाता मनो युजो दक्षक्रतवस्तेनोऽवन्तु ते नः पान्तु तेभ्यः स्वाहा ॥

इत्यस्याग्नेः समावर्तनं करोमि ।

गावऽउपावतेति गोदानकर्म -

ॐ गावऽउपावतावतं मही यज्ञस्य रप्सुदा । उभा कर्ण्णा हिरण्यया ॥

इत्यस्याग्नेर्गोदानकर्म करोमि ।

भगऽएवेति विवाहः -

ॐ भगऽएव भगवाँ२ऽअस्तु देवास्तेन व्वयं भगवन्तः स्याम । तन्त्वा भग सर्व्वऽइज्जोहवीति सनो भग पुरऽएता भवेह ॥

इत्यस्याग्नेविवाहं करोमि ।

तत ऋतावानमित्यादि कण्डिकात्रयं पठेत् -

ॐ ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् । अजस्रं घर्म्ममीमहे । उपयामगृहीतोऽसि व्वैश्वानराय त्वैषते योनिर्व्वैश्वानरायत्वा ॥

ॐ व्वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभि श्रीः । इतो जातो व्विश्वमिदं व्विचष्टे व्वैश्वानरो यतते सूर्य्येण । उपयामगृहीतोऽसि व्वैश्वानराय त्वैषते योनिर्व्वैश्वानरायत्वा ॥

आब्रह्मन्निति ब्रह्माणमग्निप्रदक्षिणं कारयित्वा "**अस्मिन् कर्मणि त्वं मे ब्रह्मा भव**" इत्युक्त्वा उदङ्मुखमुपवेशयेत्[६] -

ॐ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूरऽइषव्योतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य व्वीरो जायतान्निकामे निकामे नः पर्जन्यो व्वर्षतु फलवत्यो नऽओषधयः पच्यन्ताँ योगक्षेमो नः कल्पताम् ॥

यस्य कुर्म्म इति होतुरासनम् -

ॐ यस्य कुर्म्मो गृहे हविस्तमग्ने व्वर्द्धया त्वम्। तस्मै देवाऽअधिब्रुवन्नयञ्च ब्ब्रह्मणस्पतिः ॥

अग्ने प्रेहीति अग्नेरुत्तरतो यजमानासनम्[७] -

ॐ अग्ने प्रेहि प्रथमो देवयताञ्चक्षुर्द्देवानामुत मर्त्यानाम्। इयक्षमाणा भृगुभिः सजोषाः स्वर्यन्तु यजमानाः स्वस्ति ॥

परीत्य भूतानीति अग्नेरुत्तरतो वायव्ये च प्रणीतार्थे आसनद्वयं कल्पयित्वा प्रणीताग्न्योर्मध्ये प्रोक्षण्यासनं च निदध्यात् -

ॐ परीत्य भूतानि परीत्य लोकान्परीत्य सर्वाः प्रदिशो दिशश्च। उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसँविवेश ॥

---

६. 'यदा ब्रह्मा न भवति, तदा ब्रह्मा कौशः कार्यः' इति हरिहरः। ब्रह्मा कौशश्चेत् तदा प्रैषानुप्रैषौ न भवतः।

७. प्रचलित पद्धतिहरूमा 'अग्नेर्दक्षिणतो ब्रह्मसमीपे यजमानासनम्' अर्थात् यजमानको आसन अग्निको दक्षिणतिर ब्रह्माको नजिक राख्ने क्रम देखिन्छ। तर 'उत्तरतः उपचारो यज्ञः' अर्थात् उत्तरतिर बसेर यज्ञको सेवा गर्नू। यस वचनअनुसार स्मार्त यज्ञमा सर्वत्र यजमानको आसन अग्निको उत्तरतिर हुनुपर्दछ। दर्शपूर्णमास आदि श्रौत यज्ञमा मात्र दक्षिणतिर हुन उपयुक्त छ। कारण- "दक्षिणतो ब्रह्मयजमानयोरासने" (का.श्रौ.सू., अ.१ क.८ सू.२७) अर्थात् ब्रह्मा र यजमानको आसन अग्निको दक्षिणतिर हुनुपर्छ। यो श्रौत यज्ञलाई लिएर विधान गरिएको कुरा हो र यसै वचनका आधारमा स्मार्त यज्ञमा पनि ब्रह्मा यजमान दुवैको आसन अग्निको दक्षिणतिर स्वतः प्राप्त हुन्छ। यसरी दुवैको आसन दक्षिणतो ब्रह्मासनमास्तीर्य" (पा.गृ.सू., का.१ कं.१ सू.२) दक्षिणतिर ब्रह्माको आसन हुनुपर्छ भनेर किन भन्नुपर्थ्यो। अतः यसबाट स्पष्ट हुन्छ कि- श्रौत यज्ञमा मात्र यजमानको आसन दक्षिणतिर हुन्छ, स्मार्त यज्ञमा दक्षिणतिर नभएर उत्तरतिरै हुनुपर्छ। यस विषयमा गृह्यसूत्रको कुशकण्डिकाको भाष्यमा आचार्य गदाधरले विस्तृत शास्त्रार्थपूर्वक स्पष्ट गरेका छन्।

ॐ व्वैश्वानरो नऽऊतयऽआप्रयातु परावतः। अग्निरुक्थेन वाहसा। उपयामगृहीतोऽसि व्वैश्वानराय त्वैषते योनिर्वैश्वानरायत्वा ॥

अग्निर्म्मूर्धेति कुण्डे स्वाभिमुखं वह्निं प्रवेशयेत् -

ॐ अग्निर्म्मूर्धा दिवः ककुत्पतिः पृथिव्याऽअयम्। अपाᳬरेताᳬसि जिन्वति ॥

इति कुण्डे स्थण्डिले वा अग्निं स्थापयेत्।

स्थिरो भवेति प्रज्वालयेत् -

ॐ स्थिरो भव व्वीड्वङ्गऽआशुर्भव व्वाज्यर्वन्। पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः ॥

ततोऽग्निं प्रार्थयेत् -

ॐ आवाहये त्वां पुरुषं महान्तं सुरासुरैर्वन्दितपादपद्मम्।

ब्रह्मादयो यस्य मुखे वसन्ति विशस्व[३] कुण्डे सुरलोकनाथ ॥

ततोऽग्नेर्दक्षिणतस्त्रिभिर्दर्भैर्ब्रह्मासनमास्तीर्य[४] हिरण्यगर्भ इति मन्त्रेण पञ्चाशद्भिः कुशैर्ब्रह्मपवित्रकरणम्[५] -

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत्। सदाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ॥

आब्रह्मन्निति ब्रह्माणमग्निप्रदक्षिणं कारयित्वा "**अस्मिन् कर्मणि त्वं मे ब्रह्मा भव**" इत्युक्त्वा उदङ्मुखमुपवेशयेत्[६] -

ॐ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूरऽइषव्योतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य व्वीरो जायतान्निकामे निकामे नः पर्जन्यो व्वर्षतु फलवत्यो नऽओषधयः पच्यन्ताँ योगक्षेमो नः कल्पताम् ॥

यस्य कुर्म्म इति होतुरासनम् -

ॐ यस्य कुर्म्मो गृहे हविस्तमग्ने व्वर्द्धया त्वम्। तस्मै देवाऽअधिब्रुवन्नयञ्च ब्ब्रह्मणस्पतिः ॥

अग्ने प्रेहीति अग्नेरुत्तरतो यजमानासनम्[७] -

ॐ अग्ने प्रेहि प्रथमो देवयताञ्चक्षुर्द्देवानामुत मर्त्यानाम्। इयक्षमाणा भृगुभिः सजोषाः स्वर्यन्तु यजमानाः स्वस्ति ॥

परीत्य भूतानीति अग्नेरुत्तरतो वायव्ये च प्रणीतार्थे आसनद्वयं कल्पयित्वा प्रणीताग्न्योर्मध्ये प्रोक्षण्यासनं च निदध्यात् -

ॐ परीत्य भूतानि परीत्य लोकान्परीत्य सर्वाः प्रदिशो दिशश्च। उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसँविवेश ॥

इन्द्रऽआसामिति वारणं (तच्च दण्डेन सह द्वादशाङ्गुलदीर्घं चतुरङ्गुलविस्तारं चतुरङ्गुलखातं) प्रणीतापात्रं वामहस्तेनादाय -

ॐ इन्द्रऽआसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुरऽएतु सोमः । देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥

उदुत्तममिति दक्षिणहस्तेनोदकं सम्पूर्य वायव्यासने विधाय दक्षिणानामिकयाऽऽलभ्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्य प्रणीतापात्रं प्रणीतासने निदध्यात् -

ॐ उदुत्तमं व्वरुण पाशमस्मदबाधमं व्विमध्यमꣳश्रथाय । अथा व्वयमादित्यव्व्रते तवानागसोऽअदितये स्याम ॥

ये ते शतमिति बर्हिर्मुष्टिमादाय ईशानादिप्रागग्रैर्बर्हिर्भिरुदक्संस्थमग्नेः परिस्तरणं कुर्यात्[८] -

ॐ ये ते शतं व्वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नोऽअद्य सवितोत विष्णुर्व्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥

(च) पात्रासादनम्[९] –

तत्त्वा यामीति मन्त्रं पठित्वा यावद्भिः पदार्थैः प्रयोजनं भवति तावतः पदार्थान् द्वन्द्वशः प्राक्संस्थानुदगग्रानग्नेरुत्तरतः पश्चाद्वाऽऽसादयेत् -

ॐ तत्त्वा यामि ब्ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्ब्भिः। अहेडमानो वरुणेह बोध्युरुशꣳसमानऽआयुः प्रमोषीः ॥

त्र्यम्बकमिति पवित्रच्छेदनार्थानि प्रादेशपरिमितानि कुशतरुणानि दृढानि स्थापयेत् -

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

ॐ पवित्त्रेस्थो वैष्णव्यौ सवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्त्रेण सूर्य्यस्य रश्मिभिः । देवीरापोऽअग्ग्रेगुवोऽअग्ग्रेपुवोग्ग्रऽइममद्य यज्ञन्नयताग्ग्रे यज्ञपतिꣳसुधातुं यज्ञपतिन्देवयुवम् ॥

इमम्मे वरुण इति वारणं द्वादशाङ्गुलदीर्घं करतलसम्मितखातं पद्मपत्राकृतिं कमलमुकुलाकृतिं वा प्रोक्षणीपात्रम् (न्युब्जम्) -

ॐ इमम्मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥

घृतवतीति तैजसी मृन्मयी वा द्वादशाङ्गुलविस्तृता प्रादेशोच्चा आज्यस्थाली (न्युब्जम्) -

ॐ घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा । द्यावापृथिवी वरुणस्य धर्म्मणा विष्कभिते अजरे भूरिरेतसा ॥

अन्नपतेऽन्नस्येति तादृश्येव चरुस्थाली (न्युब्जम्) -

ॐ अन्नपतेऽन्नस्यनो देह्यनमीवस्य शुष्मिणः । प्रप्रदातारन्तारिषऽऊर्जन्नो धेहि द्विपदे चतुष्पदे ॥

ततः शादन्ददि्भरिति सम्मार्जनकुशास्त्रिप्रभृतयः -

ॐ शादन्ददि्भरवकान्दन्तमूलैर्मृदं ब्बर्स्वैस्तेगान्दꣳष्ट्राभ्याꣳसरस्वत्याऽअग्रजिह्वं जिह्वायाऽ-उत्सादमवक्रन्देन तालु वाजꣳहनुभ्यामपऽआस्येन व्वृषणमाण्डाभ्यामादित्याँ२ श्मश्रुभिः पन्थानं भ्रूब्भ्यान्द्यावापृथिवी व्वर्तोभ्याँ विद्युतङ्कनीनकाभ्याꣳशुक्लाय स्वाहा कृष्णाय स्वाहा पार्य्याणि पक्ष्माण्यवार्य्याऽइक्षवोऽवार्य्याणि पक्ष्माणि पार्य्याऽइक्षवः ।

उपयामगृहीतोऽसीति उपयमनकुशाँस्त्रयोदश -

ॐ उपयामगृहीतोऽस्यन्तर्यच्छ मघवन्पाहि सोमम् । उरुष्य रायऽएषो यजस्व ॥

समिधाग्निमिति समिधस्तिस्रः पालाश्यः प्रादेशमात्र्यः पृथक् स्थापयेत् -

ॐ समिधाग्निन्दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन्हव्या जुहोतन ॥

स्रुवः खादिरो हस्तमात्रोऽङ्गुष्ठपर्वमात्रखातः परिणाहवर्तुलपुष्करः (न्युब्जः) ।

गव्यम् आज्यम् । चरुश्चेत् त्रिप्रक्षालिता व्रीहितण्डुलाः ।

पूर्णपात्रम्- षट्पञ्चाशदधिकद्विशत(२५६)मुष्टिपरिमितं परार्घ्यम्, बहुभोक्तृपुरुषाहारपर्यन्तम् अपरार्घ्यं वा तण्डुलाद्यन्नम् । अन्यानि चोपयुक्तानि वस्तून्यासाद्य,

पवित्रनिर्माणम्- आसादिते द्वे कुशतरुणे गृहीत्वा अग्रतः प्रादेशमात्रं परिमाय तयोरुपरि आसादितानि त्रीणि कुशतरुणानि तिर्यङ् निधाय पवित्रमूलेन पवित्रे प्रदक्षिणक्रमेणावेष्ट्य त्रयाणां मूलाग्राणि द्वयोर्मूलं च दक्षिणहस्तेन, पवित्रे च वामहस्तेन गृहीत्वा '**पवित्रे स्थः**' इति मन्त्रेण प्रच्छिद्य द्वयोर्मूलं त्रीणि चोत्तरतः क्षिपेत् ।

देवस्य त्वेति द्वे पवित्रे प्रणीतापात्रे निदध्यात् -

ॐ देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । अग्नये जुष्टङ्गृह्णाम्यग्नीषोमाभ्यां जुष्टङ्गृह्णामि ॥

ततः प्रोक्षणीपात्रं प्रणीतासन्निधौ निधाय तत्र पात्रान्तरेण हस्तेन वा प्रणीतोदकमासिच्य पवित्राभ्यामुत्पूय पवित्रे प्रोक्षणीषु निधाय दक्षिणहस्तेन प्रोक्षणीपात्रमुत्थाप्य सव्ये कृत्वा तदुदकं दक्षिणहस्तस्य अनामिकाङ्गुष्ठाभ्यां त्रिरूर्ध्वं क्षिप्त्वा प्रोक्षणीभिरद्भिरासादनक्रमेणैकैकशः प्रोक्ष्य असञ्चरे (प्रणीताग्न्योरन्तराले) प्रोक्षणीपात्रं निदध्यात् ।

घृताच्यसीति आज्यस्थाल्यामासादितमाज्यं चरूँश्च प्रणीतोदकमासिच्य चरुस्थाल्यां निदध्यात् -

ॐ घृताच्यसि जुहूर्नाम्ना सेदं प्रियेण धाम्ना प्रियꣳसदऽआसीद घृताच्यस्युपभृन्नाम्ना सेदं प्रियेण धाम्ना प्रियꣳसदऽआसीद घृताच्यसि ध्रुवानाम्ना सेदं प्रियेण धाम्ना प्रियꣳसदऽआसीद । ध्रुवाऽअसदन्नृतस्य योनौ ता व्विष्णो पाहि यज्ञं पाहि मां यज्ञन्न्यम् ॥

ततो ब्रह्मा आज्यं चरुञ्च युगपदग्नावारोप्य ब्रह्माभावे स्वयं यजमानो वा ज्वलदुल्मुकमादाय धृष्टिरसीति मन्त्रेणाऽऽज्यचर्वोः समन्ताद्भ्रामयित्वा अग्नौ क्षिपेत् -

ॐ धृष्टिरस्यपाग्नेऽअग्निमामादञ्जहि निष्क्रव्यादꣳसेधा देवयजँ वह । ध्रुवमसि पृथिवीन्दृꣳह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य व्वधाय ॥

(छ) स्रुवसंस्कारः

स्रुचश्च म इति दक्षिणहस्तेन ऋजुं स्रुवमादाय -

ॐ स्रुचश्च मे चमसाश्च मे व्वायव्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मेऽधिषवणे च मे पूतभृच्चम आधवनीयश्च मे व्वेदिश्च मे ब्बर्हिश्च मेऽवभृथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् ॥

पुनन्तु मेति पूर्वाग्रमधोबिलं स्रुवमग्नौ तापयेत् -

ॐ पुनतु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु व्विश्वा भूतानि जातवेदः पुनीहि मा ॥

ततो वामे पाणावुत्तानबिलं निधाय 'प्रत्युष्टꣳरक्ष' इति दक्षिणहस्तेन सम्मार्जनकुशैः प्रणीतोदकेन स्रुवप्रोक्षणं कुर्यात् -

ॐ प्रत्युष्टꣳ रक्षः प्रत्युष्टाऽअरातयो निष्टप्तꣳरक्षो निष्टप्ताऽअरातयः । उर्व्वन्तरिक्षमन्वेमि ॥

तत अनिशितोसीति दक्षिणहस्तधृतं स्रुवं सम्मार्जनकुशानामग्रैर्मूलतोऽग्रपर्यन्तं मूलैरग्रमारभ्य अधस्तान्मूलपर्यन्तं समृज्य[10] -

ॐ अनिशितोसि सपत्क्नक्षिद्वाजिनन्त्वा वाजेध्यायै सम्मार्ज्मि ॥

पुनन्तु मेति पुनः स्रुवं प्रतप्य -

ॐ पुनतु मा देवजनाः पुनन्तु मनसा धियः। पुनन्तु व्विश्वा भूतानि जातवेदः पुनीहि मा ॥

शन्नो देवीरिति प्रणीतोदकेनाभिषिच्य -

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये। शँय्योरभिस्रवन्तु नः ॥

तत्त्वायामीति पुनः स्रुवं प्रतप्य -

ॐ तत्त्वायामि ब्ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्ब्भिः। अहेडमानो व्वरुणेह बोध्युरुशꣳसमानऽआयुः प्रमोषीः ॥

तमुत्वेति स्रुवमुदङ्मुखमात्मनो दक्षिणतो कुशोपरि निदध्यात् -

ॐ तमुत्वा दध्यङ्ङृषिः पुत्रऽईधेऽअथर्वणः। व्वृत्रहणं पुरन्दरम् ॥

॥ इति स्रुवसंस्कारः ॥

तेजोऽसीति आज्यमुत्थाप्य चरोः पूर्वेण नीत्वा अग्नेरुत्तरतः स्थापयित्वा चरुमुत्थाप्य आज्यस्य पश्चिमतो नीत्वा आज्यस्योत्तरतः स्थापयित्वा आज्यमग्नेः पश्चादानीय स्थापयेत्-

ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि प्रियन्देवानामनाधृष्टन्देवयजनमसि ॥

तथैव चरुं चानीय पशुभिरित्यग्नेः प्रदक्षिणं कारयित्वा आज्यस्योत्तरतः स्थापयेत्[११] -

ॐ पशुभिः पशूनाप्नोति पुरोडाशैर्हवीᳬंष्या । छन्दोभिः सामिधेनीर्याज्याभिर्वषट्कारान् ॥

आपवस्वेत्याज्यावेक्षणम् -

ॐ आपवस्व हिरण्यवदश्ववत्सोम वीरवत् । वाजङ्गोमन्तमा भर स्वाहा ॥

प्रत्युष्टᳬंरक्ष इति पूर्वपवित्राभ्यामाज्येन त्रिरुत्पवनम् -

ॐ प्रत्युष्टᳬंरक्षः प्रत्युष्टाऽअरातयो निष्टप्तᳬंरक्षो निष्टप्ताऽअरातयः । उर्व्वन्तरिक्षमन्वेमि ॥

आत्वा हार्षमिति अपद्रव्यनिरीक्षणम् -

ॐ आत्वा हार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलिः । विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधिभ्रशत् ॥

विष्णोरराटमिति द्वे पवित्रे आज्ये चरौ च निदध्यात् -

ॐ व्विष्णोरराटमसि व्विष्णोः श्नप्त्रेस्थो व्विष्णोः स्यूरसि व्विष्णोर्ध्रुवोसि । व्वैष्णवमसि व्विष्णवेत्वा ॥

देवस्य त्वेति प्रोक्षणीपात्रस्थपवित्राभ्यां पूर्ववत् प्रोक्षणीमुत्पूय तेनाऽऽसादितवस्तुसेचनम् -

ॐ देवस्य त्वा सवितुः प्प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । अग्नीषोमाभ्यान्त्वा जुष्टं नियुनज्मि । अद्भ्यस्त्वौषधीभ्योऽनुत्वा माता मन्यतामनु पितानुभ्राता सगर्भ्योऽनुसखा सयूथ्यः । अग्नीषोमाभ्यान्त्वा जुष्टम्प्रोक्षामि ॥

धृष्टिरसीति ज्वलदुल्मुकमाज्यचर्वोरुपरि समन्तात् प्रदक्षिणक्रमेण भ्रामयित्वाऽग्नौ क्षिपेत् -

ॐ धृष्टिरस्यपाग्नेऽअग्निमामादञ्जहि निष्क्रव्यादᳬंसेधा देवयजँ वह । ध्रुवमसि पृथिवीन्दृᳬंह ब्ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य व्वधाय ॥

(ज) ब्रह्मविष्णुप्रजापतीनां पूजनम्

तत्रादौ अर्घ्यं संस्थाप्य 'आब्रह्मन्' इति ब्रह्मार्चनं कुर्यात् -

ॐ आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूरऽइषव्योतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य व्वीरो जायतान्निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥

इदं विष्णुरिति विष्णवर्चनम् -

ॐ इदं व्विष्णुर्व्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाᳬसुरे स्वाहा ॥

प्रजापतेनेति प्रजापतिपूजनम् -

ॐ प्प्रजापते न त्वदेतान्यन्यो व्विश्वारूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नोऽअस्तु व्वयᳫस्याम पतयो रयीणाम् ॥

हिरण्यगर्भ इति हिरण्यं निदध्यात् -

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत् । सदाधार पृथिवीन्द्यामुते माङ्कस्मै देवाय हविषा विधेम ॥

(झ) अग्निपूजनम्

तदेवाग्निरित्यग्निमर्चयेत् -

ॐ तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः । तदेव शुक्रं तद्ब्रह्मताऽआपः स प्रजापतिः ॥

ततः पूर्वस्थापितसमिधस्तिस्रो विहाय अपरसमिदाधानम् -

ॐ समिधाग्निन्दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन्हव्या जुहोतन ॥

तत अग्नावेव पूर्वादिप्रदक्षिणक्रमेण ऋग्वेदादींश्च पूजयेत् ।

तत्र पूर्वे -

ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥

ॐ ऋग्वेदाय नमः ।

दक्षिणे -

ॐ इषेत्वोर्जेत्वा व्वायवस्थ देवोवः सविता प्प्रार्पयतु श्रेष्ठतमाय कर्मणऽ आप्यायध्वमघ्न्याऽइन्द्राय भागं प्रजावतीरनमीवाऽअयक्ष्मा मा व्वस्तेनऽईशत माघशꣳसो धुवाऽअस्मिन्गोपतौ स्यात बह् वीर्षजमानस्य पशून्पाहि ॥

ॐ यजुर्वेदाय नमः ।

पश्चिमे -

ॐ अग्नऽआयाहि व्वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि ॥

ॐ सामवेदाय नमः ।

उत्तरे -

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये । शँय्योरभिस्रवन्तु नः ॥

ॐ अथर्ववेदाय नमः ।

आप्यायस्वेति चरुं ब्रह्मणे समर्पयेत् -

ॐ आप्यायस्व समेतु ते व्विश्वतः सोमव्वृष्ण्यम् । भवा व्वाजस्य सङ्गथे ॥

ततोऽग्निप्रार्थनम् -

ॐ नमो यज्ञपुरुष वैश्वानर परमात्मा देवता ब्रह्मा ऋषिः कपिलवर्ण उष्णिक् छन्दो रुद्रो देवता होमे विनियोगः ।

नारद उवाच -

ॐ प्राङ्मुखस्तु स्थितो वह्निः प्राङ्मुखा एव ऋत्विजः ।

प्राङ्मुखा देवताः सर्वाः कथं प्रत्यङ्मुखो भवेत् ॥

ब्रह्मोवाच -

ॐ आवाहयेत्ततो वह्निं मन्त्रपूतेन वारिणा ।

अनलश्च जलं दृष्ट्वा भीतः प्रत्यङ्मुखो भवेत् ॥

नारद उवाच -

ॐ पावकस्य तु किं रूपं को वर्णः किञ्च लक्षणम् ।

शिरोबाहूदराङ्घ्रीणां चक्षुः श्रोत्रमुखस्य च ॥

ब्रह्मोवाच -

ॐ पावकं द्विजरूपं च त्रिनेत्रं च चतुर्भुजम् ।

त्रिशिखं सप्तजिह्वं च पञ्चलक्षणसंयुतम् ॥

त्रिभागं तु मुखं तस्य अधिकं वक्त्रमुच्यते ।

उत्तरास्ये स्थितो विष्णुर्दक्षिणास्ये प्रजापतिः ॥

मध्यवक्त्रे तु ईशान एवं ब्रह्मप्रभाषितम् ।

मूर्ध्नि चैव त्वहं ब्रह्मा मुखे चैव तु शङ्करः ॥

जिह्वायां संस्थितो विष्णुर्दंष्ट्रायां च गृहाः स्मृताः ।

नासायां देवताः सर्वाश्चक्षुषीन्दुदिवाकरौ ॥

ऋग्वेदो हृदयस्थाने बाह्वङ्गुल्योर्यजुस्तथा ।

उदरे कटिगुह्ये च सामवेदः प्रकीर्तितः ॥

अथर्वा जङ्घपादौ च ग्रीवौङ्कारस्तथैव च ।

पृष्ठे चैव तु गायत्री एवं स्यात्तु षडङ्गकम् ॥

हरकमल पिङ्गललोचन लोहिताक्षः सर्वपापप्रणाशन । इति वैश्वानरलक्षणम् ।

कस्य पुत्र, कस्य कुलोत्पन्नः, किं गोत्रम्, कः पिता, का माता इति कात्यायनवचनात् । शृङ्गीगोत्रम्, शाण्डिल्यः पिता, अरणिर्माता, उदानकुक्षिमूर्ध्वमुखललाटम् ।

ॐ काली कराली च मनोजवा च सुलोहिता चैव सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वधरा च चण्डी लोलायमाना इति सप्त जिह्वाः ॥
त्रिशिखं च चक्रधरं साक्षसूत्रकमण्डलुम् ।
व्याघ्रहस्तं दिव्यपुष्पगन्धाभरणभूषितम् ॥
अजास्कन्धसमारूढं कृष्णाजिनोत्तरीयकम् ।
ऋग्यजुःसामाथर्वाख्यवेदानां ध्वनिभूषितम् ॥
होमार्थं प्रार्थयेऽहं त्वां चर्वाज्याभ्यां हुताशन ॥

(अमुक)कर्मणि (अमुक)नामन् [१२] दिव्यरूप आवाहितो भव । तावत्तिष्ठात्र मे ब्रह्मन् यावत्कर्म

---

१२. **कर्मविशेषे अग्नेर्नामानि**

वायवीयसंहितायाम् -

लौकिके पावको ह्यग्निः प्रथमः परिकीर्तितः । अग्निश्च भरतो नाम गर्भाधाने विधीयते ॥
तथा पुंसवने चैव शुभे कर्मणि शोभनः । सीमन्ते मङ्गलो नाम प्रगल्भो जातकर्मणि ॥
नाम्नि वै पार्थिवो वह्निः प्राशने तु शुचिः स्मृतः । सभ्यनामाथ चूडायां व्रतदाने समुद्भवः ॥
वेदारम्भे हरिर्नाम राजपुत्रः समावृते । गोदाने सूर्यनामा च केशान्ते ह्यग्निरुच्यते ।
वैश्वानरो विसर्गे तु विवाहे योजकस्तथा । चतुर्थीकर्मणि शिखी धृतिरग्निस्तु सामनि ॥
लक्षहोमे वह्निनाम कोटिहोमे हुताशनः । प्रायश्चित्ते विधिर्नाम पाकयज्ञे तु साहसः ॥
पूर्णाहुत्यां मृडो नाम शान्तिके दारुणस्तथा । पौष्टिके बलदश्चैव क्रोधाग्निश्चाभिचारिके ।
वश्यर्थे कामदो नाम वनदाहे तु वर्धनः । आवसथ्ये भवेदग्निर्होमे तु सम्प्रदायकः ॥
क्रव्यादो मृतभक्षी च समुद्रे वडवानलः । युगान्ते संक्षयो नाम संवर्तः प्रलये स्मृतः ॥ इति ॥

तथा ग्रन्थान्तरे -

अग्निश्च भरतो नाम गर्भाधाने विधीयते । तथा पुंसवने चैव सीमन्ते जातकर्मणि ॥
नाम्नि वै पार्थिवो वह्निः प्राशने तु शुचिः स्मृतः । चूडायां मङ्गलो नाम व्रतदाने समुद्भवः ॥
गोदाने सूर्यनामा च विवाहे योजकस्तथा । शान्तिके दारुणो नाम पौष्टिके बलवर्धनः ॥
आवसथ्ये भवेदग्निरग्निष्टोमे प्रदायकः । वनदाहे दूतकाख्यः प्रकोष्ठे जठरः स्मृतः ॥
वायव्ये वरुणो नाम स्थावरे पावको भवेत् । क्रव्यादो मृतदाहे च समुद्रे वडवानलः ॥
युगान्ते चाक्षयो नाम वत्सरे प्रलयं गतः ॥ इति ॥

वाचस्पतौ -

लौकिके पावको ह्यग्निः प्रथमः परिकीर्तितः । अग्निस्तु मारुतो नाम गर्भाधाने प्रकीर्तितः ॥
पुंसवे चमसो नाम शोभनः शुभकर्मसु । सीमन्ते ह्यनलो नाम प्रगल्भो जातकर्मणि ॥
पार्थिवो नामकरणे प्राशनेऽन्नस्य वै शुचिः । सभ्यनामा तु चूडायां व्रतादेशे समुद्भवः ॥
गोदाने सूर्यनामा स्यात् केशान्ते याज्ञिकः स्मृतः । वैश्वानरो विसर्गे स्याद् विवाहे बलदः स्मृतः ॥

समाप्यते ।

ॐ चत्वारीति वैश्वानरमन्त्रस्य वामदेव ऋषिस्त्रिष्टुप्छन्दो वैश्वानरो देवता अग्निप्रार्थने विनियोगः ।

ॐ चत्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्तहस्तासोऽस्य ।

त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां२ आविवेश ॥

॥ इति अग्निप्रार्थनम् ॥

ततो गन्धपुष्पादिभिरग्निं पूजयेत् -

आग्नेये- **ॐ ब्रह्मणे नमः ।**

नैर्ऋत्ये- **ॐ पौष्टिकाय नमः ।**

वायव्ये- **ॐ बलवर्धनाय नमः ।**

ऐशान्ये- **ॐ प्रजापतये नमः ।**

मध्ये- **ॐ विष्णवे नमः ।**

(ञ) ब्राह्मणवरणम्

तत्रादौ कुशतिलजलयुतगन्धपुष्पाक्षतताम्बूलपूगीफलवस्त्रद्रव्याभरणादीन्यादाय -

हरि ॐ तत्सत् ॐ विष्णुः ३ इत्यादिदेशकालादीन् सङ्कीर्त्य (अमुक) गोत्रः (अमुक) प्रवरः (अमुक)

चतुर्थीकर्मणि शिखी धृतिरग्निस्तथापरे । आवसथ्यस्तथाधाने वैश्वदेवे तु पावकः ॥
ब्रह्माग्निर्गार्हपत्ये स्याद् दक्षिणाग्निरथेश्वरः । विष्णुराहवनीये स्यादग्निहोत्रे त्रयो मताः ॥
लक्षहोमेऽभीष्टदः स्यात्कोटिहोमे महाशनः । एके घृतार्चिषं प्राहुरग्निध्यानपरायणाः ॥
रुद्रादौ तु मृडो नाम शान्तिके शुभकृत्तथा । (आदिशब्दाल्लघुरुद्रशतरुद्रातिरुद्रा लक्ष्यन्ते)
पौष्टिके वरदश्चैव क्रोधाग्निश्चाभिचारिके । वश्यार्थे वशकृत्प्रोक्तो वनदाहे तु पोषकः ॥
उदरे जठरो नाम क्रव्यादः शवभक्षके । समुद्रे वाडवो हयग्निर्लये संवर्तकस्तथा ॥
सप्तविंशतिसंख्याका अग्नयः कर्मसु स्मृताः ॥ इति ॥

शर्मा/वर्मा/गुप्तः/दासः अहं मम करिष्यमाण (अमुक) कर्मणि कृताकृतावेक्षणादि-रूपब्रह्मकर्म कर्तुं तथा च (अमुक) कर्मणि प्रतिदेवतानां मुखे साज्यभागान्तम् आहवनीयद्रव्ययुतहोमकर्म कर्तुं तथा च (अमुक) कर्मणि तत्तत्कर्मविहितोपयोग्याचारकर्म कर्तुं तथा च (अमुक) कर्मणि चतुर्वेदोक्तमन्त्रजप-पाठकर्म कर्तुं नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् एभिश्चन्दनपुष्पाक्षतताम्बूलपूगीफल-वासोद्रव्याभरणादिभिर्गणपतिब्रह्महोत्राचार्यत्वेन जापकपाठकत्वेन ऋत्विक्त्वेन च युष्मानहं वृणे । ॐ वृताः स्म इति ब्राह्मणाः ब्रूयुः ।

यथा विहितं कर्म कुरुत इति यजमानो ब्रूयात् । करवामः इति ब्राह्मणाः ब्रूयुः ।

अथ ब्रह्मादीनामृत्विजां प्रार्थना -

ब्रह्मप्रार्थना -

ॐ यथा चतुर्मुखो ब्रह्मा सर्ववेदविशारदः ।

तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ॥

होतृप्रार्थना -

ॐ भगवन् सर्वधर्मज्ञ सर्वधर्मविदां वर ।

वितते मम यज्ञेऽस्मिन् होतृत्वं मे मखे कुरु ॥

आचार्यप्रार्थना -

ॐ आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ।

तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत ॥

वेदपाठकानां प्रार्थना । पूर्वदिशि ऋग्वेदपारायणार्थम् -

ॐ ऋग्वेदः पद्मपत्राक्षः गायत्रः सोमदैवतः ।

अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥

दक्षिणदिशि यजुर्वेदपारायणार्थम् -

ॐ कातराक्षो यजुर्वेदस्त्रैष्टुभो विष्णुदैवतः

काश्यपेयस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥

पश्चिमदिशि सामवेदपारायणार्थम् -

ॐ सामवेदस्तु पिङ्गाक्षो जागतः शक्रदैवतः ।

भारद्वाजस्तु विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥

उत्तरदिशि अथर्ववेदपारायणार्थम् -

ॐ बृहन्नेत्रोऽथर्ववेदोऽनुष्टुभो रुद्रदैवतः ।

वैशम्पायन विप्रेन्द्र ऋत्विक्त्वं मे मखे भव ॥

(अमुक) कर्मणि (अमुक) देवताया (अमुक) मन्त्रजपकर्म कर्तुं त्वामहं वृणे इति जापकांश्च वृणुयात् ।

ततो ब्राह्मणान् मधुपर्कादिना सम्पूज्य प्रार्थयेत् -

ॐ ब्राह्मणाः सन्तु मे शस्ताः पापात्पान्तु समाहिताः ।

वेदानां चैव दातारः पातारः सर्वदेहिनाम् ॥

जपयज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः ।

देवानां च पितॄणां च तृप्त्यर्थं पाठकाः कृताः ॥

येषां देहे स्थिताः वेदाः पावयन्ति जगत्त्रयम् ।

रक्षन्तु सततं तेऽस्मान् जपयज्ञे व्यवस्थिताः ॥

ब्राह्मणा जङ्गमं तीर्थं त्रिषु लोकेषु विश्रुतम् ।

येषां वाक्यामृतेनैव शुद्धचन्ति मलिना जनाः ॥

पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः ।

सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः ॥

श्रोत्रियाः सत्यवाचश्च वेदध्यानरताः सदा ।

यद्वाक्यामृतसंसिक्ता ऋद्धिं यान्ति नरद्रुमाः ॥

अङ्गीकुर्वन्तु कर्मैतत् कल्पद्रुमसमाशिषः ।

यथोक्तनियमैर्युक्ता मन्त्रार्थे स्थिरबुद्धयः ॥

यत्कृपालोचनात्सर्वा ऋद्धयो वृद्धिमाप्नुयुः ।

मम यज्ञे सदा पूज्याः सन्तु वै नियमान्विताः ॥

अक्रोधनास्तथा नित्यं प्रसन्नमनसः सदा ।

अदुष्टभाषिणः सन्तु मा सन्तु परनिन्दकाः ॥

ममापि नियमा हचेते भवन्तु भवतामपि ॥

॥ इति ब्राह्मणप्रार्थना ॥

(ट) पुण्याहवाचनम्

गन्धपुष्पअक्षतताम्बूलपूगीफलद्रव्यवस्त्रादिभिस्त्रीँश्चतुरः पञ्च वा अविधुरान् ब्राह्मणान् सम्पूज्य हस्ते फलादिकं गृहीत्वा -

ॐ तत्सत् ॐ विष्णुरित्यादि देशकालौ स्मृत्वा अद्येह (अमुक) गोत्रस्य (अमुक) शर्मणो/वर्मणो/गुप्तस्य/दासस्य मम गृहे करिष्यमाण (अमुक) कर्मणि **भो ब्राह्मणाः ! ॐ पुण्याहं भवन्तो ब्रुवन्तु** इति त्रिः श्रावयेत् । ते च **ॐ पुण्याहम्** इति त्रिः प्रतिवचनं ब्रूयुः ।

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा ॥

पुनः पूर्ववत् ॐ अद्येहेत्याद्युच्चार्य- **भो ब्राह्मणाः ! ॐ स्वस्ति भवन्तो ब्रुवन्तु** इति त्रिः श्रावयेत् । **ॐ स्वस्तिः** इति त्रिः प्रतिवचनम् ।

ॐ स्वस्तिनऽइन्द्रो व्वृद्धश्रवाः स्वस्तिनः पूषा व्विश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥

पुनः पूर्ववत् ॐ अद्येहेत्याद्युच्चार्य- **भो ब्राह्मणाः ! ॐ ऋद्धिं भवन्तो ब्रुवन्तु** इति त्रिः । **ॐ ऋद्धिः** इति त्रिः प्रतिवचनम् ।

ॐ सत्रस्य ऋद्धिरस्य गन्मज्योतिरमृताऽअभूम । दिवं पृथिव्याऽअध्यारुहामा व्विदाम देवान्त्स्वज्ज्योतिः ॥

पुनः पूर्ववत् ॐ अद्येहेत्याद्युच्चार्य- **भो ब्राह्मणाः ! ॐ वृद्धिं भवन्तो ब्रुवन्तु** इति त्रिः । **ॐ वृद्धिः** इति त्रिः प्रतिवचनम् ।

ॐ ज्यैष्ठचञ्च मऽआधिपत्यञ्च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे व्वरिमा च मे प्रथिमा च मे व्वर्षिमा च मे द्राघिमा च मे व्वृद्धञ्च मे व्वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥

पुनः पूर्ववत् ॐ अद्येहेत्याद्युच्चार्य- **भो ब्राह्मणाः ! ॐ कल्याणं भवन्तो ब्रुवन्तु** इति त्रिः । **ॐ कल्याणम्** इति त्रिः प्रतिवचनम् ।

ॐ यथेमां व्वाचङ्कल्याणीमावदानि जनेब्भ्यः । ब्रह्मराजन्याभ्याॐशूद्राय चार्य्याय च स्वाय चारणाय च । प्प्रियो देवानान्दक्षिणायै दातुरिह भूयासमयम्मे कामः समृद्ध्यतामुपमादो नमतु ॥

पुनः पूर्ववत् अद्येहेत्याद्युच्चार्य- **भो ब्राह्मणाः ! ॐ शान्तिं भवन्तो ब्रुवन्तु** इति त्रिः । **ॐ शान्तिः** इति त्रिः प्रतिवचनम् ।

ॐ द्यौः शान्तिरन्तरिक्षॐशान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । व्वनस्पतयः शान्तिर्व्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वॐशान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥

पुनः पूर्ववत् अद्येहेत्याद्युच्चार्य- **भो ब्राह्मणाः ! ॐ श्रियं भवन्तो ब्रुवन्तु** इति त्रिः । **ॐ श्रीः** इति त्रिः प्रतिवचनम् ।

ॐ मनसः काममाकूतिं वाचः सत्यमशीय । पशूनाॐरूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥

॥ इति पुण्याहवाचनम् ॥

(ठ) दीपपूजा

तत्र स्थिरो भवेति दीपं प्रज्वालयेत् -

ॐ स्थिरो भव वीड्वङ्गऽआशुर्भव वाज्यर्वन् । पृथुर्भव सुखदस्त्वमग्नेः पुरीषवाहणः ॥

पृष्टो दिवीति पूजनम् -

ॐ पृष्टो दिवि पृष्टोऽअग्निः पृथिव्याम्पृष्टो व्विश्वाऽओषधीराविवेश। वैश्वानरः सहसा पृष्टोऽअग्निः स नो दिवा सरिषस्पातु नक्तम्॥

इति पाद्यादिभिरुपचारैः सम्पूज्य प्रार्थयेत् -

ॐ शुभं भवतु कल्याणमारोग्यं सुखसम्पदः।

सर्वशत्रुविनाशाय दीपज्योतिर्नमोऽस्तु ते॥

(ड) कलशपूजा

तत्र वेद्या ईशानदिग्भागे अव्रणं दध्यक्षतादिभूषितं कलशं धान्योपरि स्थापयित्वा पूजयेत्, तत्प्रकारश्च यथा -

भूरसीति भूमिशोधनम् -

ॐ भूरसि भूमिरस्यदितिरसि व्विश्वधाया व्विश्वस्य भुवनस्य धर्त्री। पृथिवीं यच्छ पृथिवीन्दृꣳह पृथिवीम्मा हिꣳसीः।

धान्यमसीति धान्यं स्थापयेत् -

ॐ धान्यमसि धिनुहि देवान्प्राणाय त्वोदानाय त्वा व्यानाय त्वा। दीर्घामनु प्रसितिमायुषे धान्देवोवः सविता हिरण्यपाणिः प्रतिगृभ्ण्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनाम्पयोऽसि॥

आजिघ्रकलशमिति धान्योपरि अव्रणं कलशं स्थापयेत् -

ॐ आजिघ्र कलशं मह्या त्वा व्विशन्त्विन्दवः। पुनरूर्ज्जा निवर्तस्व सा नः सहस्रन्धुक्ष्वोरुधारा पयस्वती पुनर्म्मा विशताद्रयिः॥

वरुणस्योत्तम्भनमसीति कलशे तीर्थादिजलं प्रक्षिपेत् -

ॐ व्वरुणस्योत्तम्भनमसि व्वरुणस्य स्कम्भसर्जनीस्थो व्वरुणस्यऽऋतसदन्यसि व्वरुणस्यऽऋतसदनमसि व्वरुणस्यऽऋतसदनमासीद ॥

याऽओषधीरिति सर्वौषधीः प्रक्षिपेत् -

ॐ याऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा । मनैनु ब्बभ्रूणामहꣳशतन्धामानि सप्त च ॥

हिरण्यगर्भ इति पञ्चरत्नानि -

ॐ हिरण्यगर्भः समवर्तताग्ग्रे भूतस्य जातः पतिरेकऽआसीत् । सदाधार पृथिवीन्द्यामुते माङ् कस्मै देवाय हविषा व्विधेम ॥

याः फलिनीरिति फलादीनि -

ॐ याः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्प्रसूतास्तानो मुञ्चन्त्वꣳहसः ॥

ओषधय इति यवान् -

ॐ ओषधयः समवदन्त सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मणस्तꣳराजन्पारयामसि ॥

गन्धद्वारामिति चन्दनम् -

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

काण्डात्काण्डादिति दूर्वाङ्कुरान् -

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि । एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥

स्योना पृथिवीति सप्तमृत्तिकाः -

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म्म सप्प्रथाः ॥

अश्वत्थेव इति पञ्चपल्लवैस्तन्मुखमाच्छादयेत् -

ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता । गोभाजऽइत्किलासथ यत्सनवथ पूरुषम् ॥

बृहस्पतेऽअतीति वस्त्रयुग्मेन कलशं वेष्टयेत् -

ॐ बृहस्पतेऽअतियदर्य्योऽअर्हाद्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्प्रजात तदस्मासु द्रविणन्धेहिचित्रम् । उपयामगृहीतोसि बृहस्पतये त्वैषते योनिर्बृहस्पतये त्वा ॥

अम्बेऽअम्बिक इति आम्रपल्लवैस्तन्मुखमाच्छादयेत् -

ॐ अम्बेऽअम्बिकेऽम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥

तत्त्वा यामीति कलशे वरुणमावाह्य पाद्यादिभिरुपचारैः पूजयेत् -

ॐ तत्त्वा यामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्ब्भिः । अहेडमानो वरुणेह बोध्युरुशꣳसमानऽआयुः प्रमोषीः ॥

ततः कलशे गङ्गादितीर्थान्यावाहयेत् -

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः । आयान्तु यजमानस्य दुरितक्षयकारकाः ॥

कलशं स्पृष्ट्वाभिमन्त्रयेत् -

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।

मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥

कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा ।

ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ॥

अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ॥

ततः कलशप्रार्थना -

ॐ देवदानवसंवादे मथ्यमाने महोदधौ ।

उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥

त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।

त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठताः ॥

शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।

आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥

त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।

त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥

सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥

ॐ नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय ।

सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥

(ढ) गणेशपूजा

हस्ते कुशयवजलान्यादाय सङ्कल्पः -

ॐ अद्येहेत्यादि करिष्यमाण (अमुक) कर्म निर्विघ्नतया परिसमाप्त्यर्थम् (अमुक) कर्माङ्गतया गणेशपूजनमहं करिष्ये ।

इति सङ्कल्प्य “गणानान्त्वा”, “हे हेरम्ब” इत्यादिमन्त्रैरावाहयेत् -

ॐ गणानान्त्वा गणपतिᳬहवामहे प्रियाणान्त्वा प्रियपतिᳬहवामहे निधीनान्त्वा निधिपतिᳬहवामहे व्वसो मम । आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ॥

ॐ हे हेरम्ब त्वमेहचेहि अम्बिकात्र्यम्बकात्मज ।

सिद्धिबुद्धिपते त्र्यक्ष लक्ष्यलाभयितः पितः ॥

नागास्य नागहार त्वं गणराज चतुर्भुज ।

भूषितैः स्वायुधैर्दिव्यैः पाशाङ्कुशपरस्वधैः ॥

आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः ।

इहागत्य गृहाण त्वं पूजां क्रतुं च रक्ष माम् ॥ इत्यावाह्य

ॐ भूर्भुवःस्वः सिद्धिबुद्धिसहिताय साङ्गाय सायुधाय सवाहनाय सपरिवाराय श्रीमन्महागणाधिपतये नमः, इदमासनं समर्पयामि ।

ततः सहस्रशीर्षेत्यादिषोडशमन्त्रैः षोडशोपचारैः पूजयेत्, तद्यथा -

आसनम्, पाद्यम्, अर्घ्यम्, आचमनीयम्, पञ्चामृतम्, शुद्धोदकम्, यज्ञोपवीतम्, वस्त्रम्, अलङ्कारादियल्लब्धम्, चन्दनम्, दूर्वा, अक्षताः, धूपः, दीपः, नैवेद्यम्, आचमनीयम्, ताम्बूलम्, दक्षिणाद्रव्यम्, पादवन्दनम् । एभिः सम्पूज्य नारिकेलादिफलं सवस्त्रं पुरतः पात्रे निधाय स्तुतिं कुर्यात् -

ॐ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक ।

भक्तानामभयं कर्ता त्राता भव भवार्णवात् ॥

द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो ।

वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ॥

इदं फलं प्रियं तुभ्यं अर्पयामि गणाधिप ।

अनेन फलदानेन फलदोऽस्तु सदा मम ॥

वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ ।

इति सङ्कल्प्य “गणानान्त्वा”, “हे हेरम्ब” इत्यादिमन्त्रैरावाहयेत् -

ॐ गणानान्त्वा गणपतिꣳहवामहे प्रियाणान्त्वा प्रियपतिꣳहवामहे निधीनान्त्वा निधिपतिꣳहवामहे व्वसो मम । आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ॥

ॐ हे हेरम्ब त्वमेहचेहि अम्बिकात्र्यम्बकात्मज ।

सिद्धिबुद्धिपते त्र्यक्ष लक्ष्यलाभयितः पितः ॥

नागास्य नागहार त्वं गणराज चतुर्भुज ।

भूषितैः स्वायुधैर्दिव्यैः पाशाङ्कुशपरस्वधैः ॥

आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः ।

इहागत्य गृहाण त्वं पूजां क्रतुं च रक्ष माम् ॥ इत्यावाह्य

ॐ भूर्भुवःस्वः सिद्धिबुद्धिसहिताय साङ्गाय सायुधाय सवाहनाय सपरिवाराय श्रीमन्महागणाधिपतये नमः, इदमासनं समर्पयामि ।

ततः सहस्रशीर्षेत्यादिषोडशमन्त्रैः षोडशोपचारैः पूजयेत्, तद्यथा -

आसनम्, पाद्यम्, अर्घ्यम्, आचमनीयम्, पञ्चामृतम्, शुद्धोदकम्, यज्ञोपवीतम्, वस्त्रम्, अलङ्कारादियल्लब्धम्, चन्दनम्, दूर्वा, अक्षताः, धूपः, दीपः, नैवेद्यम्, आचमनीयम्, ताम्बूलम्, दक्षिणाद्रव्यम्, पादवन्दनम् । एभिः सम्पूज्य नारिकेलादिफलं सवस्त्रं पुरतः पात्रे निधाय स्तुतिं कुर्यात् -

ॐ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक ।

भक्तानामभयं कर्ता त्राता भव भवार्णवात् ॥

द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो ।

वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ॥

इदं फलं प्रियं तुभ्यं अर्पयामि गणाधिप ।

अनेन फलदानेन फलदोऽस्तु सदा मम ॥

वक्रतुण्ड महाकाय कोटिसूर्य समप्रभ ।

अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

ॐ विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय ।

नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ॥

(ण) रक्षाबन्धनपूजा

यव-कुश-दूर्वा-सर्षप-चन्दन-गोमय-हरिद्रा-दधिसहितां रक्षां ताम्रपात्रे निधाय पात्रं स्पृशन् नारायणकवचं पठेत् -

ॐ पूर्वे रक्षतु गोविन्द आग्नेय्यां धरणीधरः ।

याम्यां रक्षतु वाराहो नारसिंहस्तु नैर्ऋते ॥

वारुण्यां केशवो रक्षेद् वायव्यां मधुसूदनः ।

उत्तरे श्रीधरो रक्षेदधस्तात्तु महीधरः ॥

एवं दशदिशो रक्षेद् वासुदेवो जनार्दनः ।

यज्ञाग्रे रक्षताच्छङ्खः पृष्ठे वै पद्ममुत्तमम् ॥

वामपार्श्वे गदा रक्षेद् दक्षिणे तु सुदर्शनः ।

उपेन्द्रः पातु ब्रह्माणमाचार्यं पातु वामनः ॥

ऋग्वेदमच्युतो रक्षेद्यजुर्वेदमधोक्षजः ।

कृष्णो रक्षतु सामानमथर्वाणञ्च माधवः ॥

उपविष्टाँश्च विप्राँस्ताननिरुद्धोऽभिरक्षतु ।

यजमानं सपत्नीकं पुण्डरीकाक्ष एव तु ॥

रक्षाहीनं तु यत्स्थानं तत्सर्वं रक्षताद्धरिः ।

वेदमन्त्रैश्च कर्तव्या रक्षा शुभ्रैस्तु सर्षपैः ॥

कृत्वा पोटलिकां पूर्वं बध्नीयाद्दक्षिणे करे ॥

ततो वक्ष्यमाणमन्त्रैः रक्षासूत्रं पूजयेत् -

ॐ रक्षोहणं व्वलगहनं व्वैष्णवीमिदमहन्तं व्वलगमुत्किरामि यम्मे निष्ट्यो यममात्यो निचखानेदमहन्तं व्वलगमुत्किरामि यम्मे समानो यमसमानो निचखानेदमहन्तं व्वलगमुत्किरामि यम्मे सबन्धुर्यमसबन्धुर्निचखानेदमहन्तं व्वलगमुत्किरामि यम्मे सजातो यमसजातो निचखानोत्कृत्याङ्किरामि ॥

ॐ स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा सर्वराडस्यमित्रहा ॥

ॐ रक्षोहणो वो व्वलगहनः प्रोक्षामि वैष्णवान्रक्षोहणो वो व्वलगहनोऽवनयामि वैष्णवान्रक्षोहणो वो व्वलगहनोऽवस्तृणामि वैष्णवान्रक्षोहणौ वां व्वलगहनाऽउपदधामि व्वैष्णवी रक्षोहणौ वां व्वलगहनौ पर्य्यूहामि व्वैष्णवी व्वैष्णवमसि व्वैष्णवास्थ ॥

ॐ सप्तऽऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् । सप्तापः स्वपतो लोकमीयुस्तत्र जागृतोऽअस्वप्नजौ सत्रसदौ च देवौ ॥

॥ इति रक्षाबन्धनपूजा ॥

ततः कलशस्कन्धप्रदेशे पूजनम् -

ॐ गणपतिसूर्यदेवीशिवविष्णून्, विनायकदुर्गावाय्वाकाशाश्विनीकुमारान्, सूर्यसोमभौमबुधबृहस्पतिशुक्रशनिराहुकेतून्, ईश्वरोमास्कन्दहरिब्रह्मेन्द्रयमकालचित्रगुप्तान्, अग्निअप्भूमिविष्णु-इन्द्रेन्द्राणीप्रजापतिसर्पब्रह्मणः, इन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशानब्रह्मानन्तान्, ध्रुवाद्यष्टवसून्, धात्रादिद्वादशादित्यान्, वीरभद्राद्येकादशरुद्रान्, गौर्यादिषोडशमातृः, आवहादिसप्तमरुतः, विनायकब्रह्मविष्णुरुद्रार्कवनस्पतीन्, आत्मन इष्टदेवताः कुलदेवताश्च, ग्रामदेवताः, स्थानदेवताश्चावाह्य यथामिलितोपचारैः (पञ्चोपचारैः षोडशोपचारैर्वा) पूजयेत् ।

(त) होमसङ्कल्पः

कुशादिकमादाय -

ॐ तत्सत् ॐ विष्णुः ३ इत्यादिदेशकालादीन् सङ्कीर्त्य (अमुक) गोत्रस्य (अमुक) प्रवरस्य

(अमुक)शाखान्तर्गत (अमुक)वेदाध्यायिनो (अमुक)शर्मणो / वर्मणो / गुप्तस्य / दासस्य मम (अमुक) कर्मणि आघाराज्यभागपञ्चवारुणिहोमपूर्वकप्रधानभूतेभ्यो देवेभ्यो गणपत्यादिपञ्चायतनेभ्यो विनायकादिपञ्चलोकपालेभ्यः सूर्यादिनवग्रहेभ्य ईश्वराद्यधिदेवेभ्योऽग्न्यादिप्रत्यधिदेवेभ्य इन्द्रादिदशदिकपालेभ्यो ध्रुवाद्यष्टवसुभ्यो धात्रादिद्वादशादित्येभ्यो वीरभद्राद्येकादशरुद्रेभ्यो गौर्यादिषोडशमातृभ्य आवहादिसप्तमरुद्भ्यो विनायकब्रह्मविष्णुरुद्रार्कवनस्पतिभ्यः प्रधानदेवेभ्यः तथा चतुःस्वस्तिभ्यः पयःपञ्चभ्यः षड्विष्णुभ्यो द्वादशदेवताभ्यो द्वादशशान्तिभ्यः षट्प्रातर्भ्यः षड्वातेभ्यस्त्र्यनडुद्भ्यः पञ्चभगेभ्यः पञ्चेन्द्रियेभ्यः पञ्चवरुणेभ्यो गायत्र्यै सावित्र्यै सरस्वत्यै गृहमात्रेऽन्नपूर्णायै महालक्ष्म्यै महारिष्टविनाशिन्यै चण्डचै द्यौराल्यै वास्तुदेवाय भूमिदेवाय गैडुदेवाय क्षेत्रपालाय ग्रामदेवाय स्वर्गेन्द्राय पातालवासुकिभ्यो मित्रलोकपालाय मान्धात्रे तीर्थराजाय व्रतराजाय पुनर्दिक्पालेभ्यस्तिथिभ्यो नक्षत्रेभ्यो वारेभ्यः करणेभ्यो वातेभ्यो मेघेभ्यः समुद्रेभ्यो नदीभ्य इष्टदेवेभ्यः कुलदेवेभ्यः स्थापितदेवेभ्यो भैरवाय भैरव्यै विन्ध्यवासिन्यै स्थानविशेषाधिपतिदेवताभ्यः सर्वदेवेभ्यः सर्वहोमपूरणार्थेभ्यः पञ्चपाण्डवेभ्यो भीमसेनाय पितृभ्यो वैश्वानराय तथोत्तराङ्गत्वेन भूर्भुवःस्वः अग्निवरुणसवितृविष्णुविश्वेदेवमरुत्स्वर्क-प्रजापतिस्विष्टकृद्देवेभ्यश्च इदमाज्यादिद्रव्यहोमं यथासंख्येन ब्राह्मणद्वारा अहं करिष्ये ।

॥ इति होमसङ्कल्पः ॥

ततः उपयमनकुशान् वामहस्ते कृत्वोत्तिष्ठन् प्रजापतिं मनसा ध्यायन् समिद्धतमेऽग्नौ समिधाग्निमिति पूर्वस्थापितास्तिस्रः समिधः प्रक्षिपेत् -

ॐ समिधाग्निन्दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन्हव्या जुहोतन ॥

उपविश्य, पृष्टो दिवीति मन्त्रेण दक्षिणचुलुकेन सपवित्रं प्रोक्षण्युदकमादाय -

ॐ पृष्टो दिवि पृष्टोऽअग्निः पृथिव्यां पृष्टो विश्वाऽओषधीराविवेश । वैश्वानरः सहसा पृष्टोऽअग्निः स नो दिवा सरिषस्पातु नक्तम् ॥

सुसमिद्धायेति मन्त्रेण तज्जलेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य -

ॐ सुसमिद्धाय शोचिषे घृतन्तीव्रञ्जुहोतन । अग्नये जातवेदसे ॥

पातितदक्षिणजानुः कुशेन ब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ[१३] स्रुवेणाज्याहुतीर्जुहोति, तत्र आघारादारभ्य द्वादशाहुतिषु तत्तदाहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ।

(थ) प्रजापत्यादिवनस्पत्यन्तहोमः

ॐ प्रजापतय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः ।

ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । (मनसा) प्रोक्षणीपात्रेऽपि ।

ॐ इन्द्रायेति प्रजापतिऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता आज्यहोमे विनियोगः ।

ॐ इन्द्राय स्वाहा । इदमिन्द्राय न मम । (इति आघारौ) प्रोक्षणीपात्रेऽपि ।

ॐ अग्नय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः ।

ॐ अग्नये स्वाहा । इदमग्नये न मम । प्रोक्षणीपात्रेऽपि ।

ॐ सोमायेति प्रजापतिऋषिस्त्रिष्टुप्छन्दः सोमो देवता आज्यहोमे विनियोगः ।

ॐ सोमाय स्वाहा । इदं सोमाय न मम । (इति आज्यभागौ) प्रोक्षणीपात्रेऽपि ।

ॐ भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापतिऋषिरग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छदांसि अग्न्याधाने विनियोगः ।

---

१३. **होमे श्रुवधारणप्रकारः -**

अग्रे धृतोऽर्थनाशः स्यान्मध्ये चैव मृतप्रजा । मूले च म्रियते होता स्रुवस्तु कुत्र धार्यते ॥

अग्रमध्याच्च यन्मध्यं मूलमध्याच्च मध्यतः । स्रुवं धारयते विद्वान् ज्ञातव्यं च सदा बुधैः ॥

तर्जनीं च बहिः कृत्वा कनिष्ठां च बहिस्ततः । मध्यमानामिकाङगुष्ठैः स्रुवं धारयते द्विजः ॥

आहुतिप्रदानस्थलविचारः -

आस्यान्तर्जुहुयाद् वह्नेः पण्डितः सर्वकर्मसु । बधिरत्वं कर्णहोमे नेत्रे त्वन्धत्वमाप्नुयात् ॥

नासिकायां मनः पीडा शिरो होमे तु मृत्युदः ॥

अङ्गज्ञानञ्चाह -

यत्र काष्ठं तत्र श्रोत्रं यत्र धूमोऽथ नासिका । यत्राल्पज्वलनं नेत्रं यतो भस्म ततः शिरः ॥

यत्र प्रज्वलितो वह्निस्तन्मुखं जातवेदसः । घृतधारास्ततो दद्याद् यावत् स्विन्नो भवेच्चरुः ॥

अन्यत्र च -

"अदीप्तेऽग्नौ हतो होमः" इति ।

ॐ भूः स्वाहा । इदमग्नये न मम । प्रोक्षणीपात्रेऽपि ।

ॐ भुवः स्वाहा । इदं वायवे न मम । प्रोक्षणीपात्रेऽपि ।

ॐ स्वः स्वाहा । इदं सूर्याय न मम । प्रोक्षणीपात्रेऽपि । एता महाव्याहृतयः ।

पञ्चवारुणिहोमः –

ॐ त्वन्नोऽअग्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दः अग्नीवरुणौ देवते प्रायश्चित्तहोमे विनियोगः ।

ॐ त्वन्नोऽअग्ने व्वरुणस्य व्विद्वान् देवस्य हेडोऽअवयासिसीष्ठाः । यजिष्ठो व्वह्नितमः शोशुचानो व्विश्वा द्वेषाᳬसि प्रमुमुग्ध्यस्मत् स्वाहा ॥

इदमग्नीवरुणाभ्यां न मम । प्रोक्षणीपात्रेऽपि ।

ॐ सत्वन्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दः अग्नीवरुणौ देवते आज्यहोमे विनियोगः ।

ॐ स त्वन्नोऽअग्नेवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ । अवयक्ष्व नो व्वरुणᳬरराणो व्वीहि मृडीकᳬसुहवोनऽएधि स्वाहा ॥

इदमग्नीवरुणाभ्यां न मम । प्रोक्षणीपात्रेऽपि ।

ॐ अयाश्चाग्न इति वामदेव ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः ।

ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्त्वमयाऽअसि । अया नो यज्ञं व्वहास्यया नो धेहि भेषजᳬस्वाहा ॥

इदमग्नये न मम । प्रोक्षणीपात्रेऽपि ।

ॐ ये ते शतमिति वामदेव ऋषिस्त्रिष्टुप्छन्दो वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवता प्रायश्चित्तहोमे विनियोगः ।

ॐ ये ते शतं व्वरुणं ये सहस्रं यज्ञियाः पाशा व्वितता महान्तः । तेभिर्नोऽअद्य सवितोत व्विष्णुर्व्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥

इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम । प्रोक्षणीपात्रेऽपि ।

ॐ उदुत्तममिति शुनःशेप ऋषिस्त्रिष्टुप्छन्दो वरुणो देवता पाशान्मोचने विनियोगः ।

ॐ उदुत्तमं व्वरुण पाशमस्मदवाधमं व्विमध्यमꣳश्रथाय । अथा व्वयमादित्यव्रते तवानागसोऽअदितये स्याम स्वाहा ॥

इदं वरुणाय न मम । प्रोक्षणीपात्रेऽपि । एताः प्रायश्चित्तसंज्ञकाः ।

॥ इति पञ्चवारुणिहोमः ॥

प्रधानदेवताहोमः [१४]

ॐ गणानान्त्वा गणपतिꣳहवामहे प्प्रियाणान्त्वा प्प्रियपतिꣳहवामहे निधीनान्त्वा निधिपतिꣳहवामहे व्वसोमम । आहमजानि गर्ब्भधमात्वमजासि गर्ब्भधꣳस्वाहा ॥

---

१४. **अथ प्रधानदेवताहोमसूत्राणि**

गणेशो भास्करो देवी शिवो विष्णुश्च पञ्चमः । पञ्चायतननामानि कथिताः पञ्चदेवताः ॥१॥
विनायकस्तथा दुर्गा वायुराकाश एव च । नासत्यौ चेति पञ्चैते लोकपाला प्रकीर्तिताः ॥२॥
सूर्यः सोमश्च भौमश्च बुधो जीवश्च भार्गवः । शनी राहुश्च केतुश्च कथिताश्च नवग्रहाः ॥३॥
ईश्वरश्च उमा स्कन्दो विष्णुर्ब्रह्मा शचीपतिः । यमः कालश्चित्रगुप्त इत्येता अधिदेवताः ॥४॥
अग्निरापो धरा विष्णुरिन्द्र ऐन्द्री प्रजापतिः । सर्पा ब्रह्मा क्रमात् प्रोक्ता नव प्रत्यधिदेवताः ॥५॥
इन्द्राग्नी यमनिर्ऋती वरुणो मरुतो विधुः । ईशो ब्रह्मा तथानन्तो दिक्पालाः दश कीर्तिताः ॥६॥
ध्रुवाद्यष्टवसुर्ज्ञेयो धात्रादित्यास्तु द्वादश । वीरभद्राद्येकादश गौर्यादिमातृषोडश ॥७॥
आवहादिमरुत्सप्त विनायकविधी हरिः । रुद्रश्चार्कस्तथा प्रोक्तो वनस्पतिः क्रमेण हि ॥८॥
चतुःस्वस्तिः पयःपञ्च षड्विष्णुर्देव द्वादश । शान्तिर्द्वादश षट्प्रातः षड्वातास्तु क्रमेण हि ॥९॥
अनडुत्संज्ञको ज्ञेयो होमकर्मणि वै ध्रुवम् । पञ्चभगेन्द्रियाः पञ्च वरुणाः पञ्च एव च ॥१०॥
गायत्री चैव सावित्री वाग्देवी गृहमातृकाः । अन्नपूर्णा महालक्ष्मी महारिष्टविनाशिनी ॥११॥
चण्डी द्यौराली विज्ञेया वास्तुभूम्यस्तथैव च । गैडुश्च क्षेत्रपालश्च ग्रामदेवास्ततः परम् ॥१२॥
स्वर्गेन्द्रो वासुकिश्चैव मित्रलोकस्तथैव च । मान्धाता तीर्थराजश्च व्रतराजस्ततः परम् ॥१३॥
पुनर्दिक्पालका ज्ञेयास्तिथिनक्षत्रयोगकाः । वारश्च करणश्चैव वायुमेघसमुद्रकाः ॥१४॥
नदीष्टकुलदेवाश्च स्थापिता देवताः क्रमात् । भैरवो भैरवी विन्ध्यवासिनी स्थानदेवताः ॥१५॥
एषोह सर्वदेवाश्च शुक्रज्योतिस्तथैव च । पाण्डवाः पितरश्चैव वैश्वानरः क्रमेण च ॥१६॥
पूर्णपात्रं ततो दद्याद् बर्हिर्होमस्ततः परम् । गोभूरत्नहिरण्यादि-रौप्यवस्त्राणि चैव हि ॥१७॥
देयानि द्विजमुख्येभ्यो यजमानै र्विशेषतः ॥ इति होमसूत्राणि ॥

चरुहोमे मुद्राविचार-

तिस्रो मुद्रास्तु सम्प्रोक्ता मृगी हंसी च सूकरी । सूकरी करसङ्कोचाद् हंसी मुक्तकनिष्ठिका ॥
कनिष्ठातर्जनीहीना मृगी मुद्रा तिलाहुतौ । शान्तिकर्मणि सर्वत्र मृगी हंसी शुभे उभे ॥
अभिचारेषु सर्वेषु सूकरी तु प्रकीर्तिता ॥

इदं गणपतये न मम ।

ॐ आकृष्णेन रजसा व्वर्तमानो निवेशयन्नमृतं मर्त्यञ्च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा ॥

इदं सूर्याय न मम ।

ॐ देवीर्द्वारऽइन्द्रꣳसङ्घाते व्वीड्वीर्यामन्नवर्धयन् । आवत्सेन तरुणेन कुमारेण च मीवतां पार्वाणꣳरेणुककाटन्नुदन्ताँ व्वसुवने व्वसुधेयस्य व्यन्तु यज स्वाहा ।

इदं देव्यै न मम ।

ॐ नमः शम्भवाय च मयो भवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च स्वाहा ।

इदं शिवाय न मम । अत्र प्रणीतोदकस्पर्शः ।

ॐ व्विष्णो रराटमसि व्विष्णोः श्नप्त्रेस्थो व्विष्णोः स्यूरसि व्विष्णोर्ध्रुवोसिव्वैष्णवमसि व्विष्णवेत्वा स्वाहा ।

इदं विष्णवे न मम ।

॥ इति पञ्चायतनाः ॥

लोकपालाः –

ॐ गणानान्त्वा गणपतिꣳहवामहे प्प्रियाणान्त्वा प्प्रियपतिꣳहवामहे निधीनान्त्वा निधिपतिꣳहवामहे व्वसोमम । आहमजानि गर्ब्भधमात्वमजासि गर्ब्भधꣳस्वाहा ॥

इदं विनायकाय न मम ।

ॐअम्बेऽअम्बिकेम्बालिके न मानयति कश्चन ।ससस्त्यश्वकःसुभद्रिकांकाम्पीलवासिनीꣳस्वाहा ॥

इदं दुर्गायै न मम ।

ॐ व्वायो ये ते सहस्रिणो रथासस्तेभिरागहि । नियुत्वान्त्सोमपीतये स्वाहा ॥

इदं वायवे न मम ।

ॐ ऊर्ध्वाऽअस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचीꣳष्यग्नेः । द्युमत्तमाः सुप्रतीकस्य सूनोः स्वाहा ।

इदमाकाशाय न मम ।

ॐ अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्च्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन व्वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण ब्बलाय श्रियै यशसेभिषिञ्चामि स्वाहा ।

इदमश्विनीकुमाराभ्यां न मम ।

॥ इति पञ्च लोकपालाः ॥

नवग्रहाः –

ॐ आकृष्णेन रजसा व्वर्तमानो निवेशयन्नमृतं मर्त्यञ्च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा ॥

इदं सूर्याय न मम ।

ॐ इमन्देवाऽअसपत्नꣳसुवध्वम्महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय । इमममुष्य पुत्रममुष्यै पुत्रमस्यै व्विशऽएषवोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳराजा स्वाहा ॥

इदं सोमाय न मम ।

ॐ अग्निर्म्मूर्धा दिवः ककुत्पतिः पृथिव्याऽअयम् । अपाꣳरेताꣳसि जिन्वति स्वाहा ॥

इदं भौमाय न मम ।

ॐ उद्‌बुध्यस्वाग्ने प्रतिजागृहित्वमिष्टापूर्ते सꣳसृजेथामयञ्च । अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन् व्विश्वेदेवा यजमानश्च सीदत स्वाहा ॥

इदं बुधाय न मम ।

ॐ ब्बृहस्पतेऽअति यदर्य्योऽअर्हाद्युमद्‌विभाति क्रतुमज्जनेषु । यद्‌दीदयच्छवसऽऋतप्रजा ततदस्मासु द्रविणन्धेहि चित्रम् । उपयामगृहीतोऽसि ब्बृहस्पतये त्वैषते योनिर्ब्बृहस्पतयेत्वा स्वाहा ॥

इदं बृहस्पतये न मम ।

ॐ अन्नात्परिस्रुतो रसम्ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमम्प्रजापतिः । ऋतेन सत्यमिन्द्रियँ व्विपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदं पयोमृतम्मधु स्वाहा ॥

इदं शुक्राय न मम ।

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये । शँय्योरभिस्रवन्तुनः स्वाहा ॥

इदं शनैश्चराय न मम ।

ॐ कया नश्चित्रऽआभुवदूती सदावृधः सखा । कया शचिष्ठया वृता स्वाहा ॥

इदं राहवे न मम ।

ॐ केतुङ्कृण्वन्नकेतवे पेशो मर्य्याऽअपेशसे । समुषद्भिरजायथाः स्वाहा ।

इदं केतुभ्यो न मम ॥

॥ इति नवग्रहाः ॥

अधिदेवताः –

ॐ त्र्यम्बकँ यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्व्वारुकमिव ब्बन्धनान्मृत्योर्मुक्षीय मामृतात् स्वाहा ॥

इदमीश्वराय न मम । अत्र प्रणीतोदकस्पर्शः [१५]

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽ इषाण स्वाहा ॥

इदमुमायै न मम ।

ॐ यदक्रन्दः प्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवा पुरीषात् । श्येनस्य पक्षा हरिणस्य ब्बाहूऽउपस्तुत्यम्महि जातन्तेऽअर्वन् स्वाहा ॥

इदं स्कन्दाय न मम ।

ॐ व्विष्णो रराटमसि व्विष्णोः श्नप्त्रेस्थो व्विष्णोः स्यूरसि । व्विष्णोर्ध्रुवोसि व्वैष्णवमसि व्विष्णवेत्वा स्वाहा ॥

इदं विष्णवे न मम ।

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो व्वेनऽआवः । स बुध्न्याऽउपमाऽअस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः स्वाहा ॥

---

१५. रौद्रमासुरमाभिचारणिकं च मन्त्रमुक्त्वा पित्र्यम्, आत्मानं च आलभ्य उपस्पृशेदपः इति का० श्रौ० सू० वचनात् ।

इदं ब्रह्मणे न मम ।

ॐ त्रातारमिन्द्रमवितारमिन्द्र ँ्हवे हवे सुहव ँ्शूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्र ँ्स्वस्ति नो मघवा धात्विन्द्रः स्वाहा ॥

इदमिन्द्राय न मम ।

ॐ यमायत्वा मखायत्वा सूर्यस्यत्वा तपसे । देवस्त्वा सविता मध्वानक्तु पृथिव्याः स ँ्स्पृशस्पाहि । अर्च्चिरसि शोचिरसि तपोऽसि स्वाहा ॥

इदं यमाय न मम । अत्र प्रणीतोदकस्पर्शः ।

ॐ कार्षिरसि समुद्रस्य त्वा क्षित्याऽउन्नयामि ।

समापोऽअद्‌भिरग्मत समोषधीभिरोषधीः स्वाहा ॥

इदं कालाय न मम । अत्र प्रणीतोदकस्पर्शः ।

ॐ इन्धानास्त्वा शत ँ्हिमा द्युमन्त ँ्समिधीमहि । वयस्वन्तो वयस्कृत ँ् सहस्वन्तः सहस्कृतम् । अग्ने सपत्नदम्भनमदब्धासोऽअदाभ्यम् । चित्रावसो स्वस्तिते पारमशीय स्वाहा ॥

इदं चित्रगुप्ताय न मम । अत्र प्रणीतोदकस्पर्शः ।

॥ इत्यधिदेवताः ॥

प्रत्यधिदेवताः –

ॐ अग्निन्दूतं पुरो दधे हव्यवाहमुपब्रुवे । देवाँ२ऽआसादयादिह स्वाहा ॥

इदमग्नये न मम ।

ॐ अप्स्वग्ने सधिष्टव सौषधीरनुरुध्यसे । गर्ब्भे सञ्जायसे पुनः स्वाहा ॥

इदमद्‌भ्यो न मम ।

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म्म सप्प्रथाः स्वाहा ॥

इदं भूम्यै न मम ।

ॐ इदं विष्णुर्व्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पा ँ्सुरे स्वाहा ॥

इदं विष्णवे न मम ।

ॐ इन्द्रऽआसान्नेता ब्बृहस्पतिर्दक्षिणा यज्ञः पुरऽएतु सोमः । देवसेनानामभिभञ्जतीनाञ्जयन्तीनां मरुतो यन्त्वग्रꣳस्वाहा ॥

इदमिन्द्राय न मम ।

ॐ अदित्यै रास्नासीन्द्राण्याऽउष्णीषः । पूषासि घर्म्माय दीष्व स्वाहा ॥

इदमिन्द्राण्यै न मम ।

ॐ प्रजापते न त्वदेतान्यन्यो व्विश्वा रूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नोऽअस्तु व्वयꣳस्याम पतयो रयीणाꣳस्वाहा ॥

इदं प्रजापतये न मम ।

ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु । येऽअन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः स्वाहा ॥

इदं सर्पेभ्यो न मम ।

ॐ ब्ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो व्वेनऽआवः सबुध्न्याऽउपमाऽअस्य व्विष्ठाः । सतश्च योनिमसतश्च व्विवः स्वाहा ॥

इदं ब्रह्मणे न मम ।

॥ इति प्रत्यधिदेवताः ॥

दशदिक्पालाः –

ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवे हवे सुहवꣳशूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्रꣳस्वस्तिनो मघवा धात्विन्द्रः स्वाहा ॥

इदमिन्द्राय न मम ।

ॐ अग्निन्दूतं पुरो दधे हव्यवाहमुपब्रुवे । देवाँ२ऽ आसादयादिह स्वाहा ॥

इदमग्नये न मम ।

ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे । देवस्त्वा सविता मध्वानक्तु पृथिव्याः सꣳस्पृशस्पाहि । अर्च्चिरसि शोचिरसि तपोऽसि स्वाहा ॥

इदं यमाय न मम । अत्र प्रणीतोदकस्पर्शः ।

ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहि तस्करस्य । अन्यमस्मदिच्छ सातऽइत्यानमो देवि निर्ऋते तुभ्यमस्तु स्वाहा ॥

इदं निर्ऋतये न मम । अत्र प्रणीतोदकस्पर्शः ।

ॐ व्वरुणस्योत्तम्भनमसि व्वरुणस्य स्कम्भसर्जनीस्थो व्वरुणस्यऽऋतसदन्यसि व्वरुणस्यऽऋतसदनमसि व्वरुणस्यऽऋतसदनमासीद स्वाहा ॥

इदं वरुणाय न मम ।

ॐ व्वायो ये ते सहस्रिणो रथासस्तेभिरागहि । नियुत्वान्त्सोमपीतये स्वाहा ।

इदं वायवे न मम ।

ॐ सोमो धेनुꣳसोमोऽअर्वन्तमाशुꣳसोमो व्वीरङ्कर्मण्यन्ददाति । सादन्यं व्विदथ्यꣳसभेयं पितृश्रवणं यो ददाशदस्मै स्वाहा ॥

इदं सोमाय न मम ।

ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम् । पूषानो यथावेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये स्वाहा ॥

इदमीशानाय न मम । अत्र प्रणीतोदकस्पर्शः ।

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो व्वेनऽआवः । सबुध्न्याऽउपमाऽअस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः स्वाहा ॥

इदं ब्रह्मणे न मम ।

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । सभूमिꣳसर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलꣳस्वाहा ॥

इदमनन्ताय न मम ।

॥ इति दशदिक्पालाः ॥

अष्टवसवः –

ॐ सुगावो देवाः सदनाऽअकर्म य आजग्मेदꣳसवनञ्जुषाणाः । भरमाणा व्वहमाना हवीꣳष्यस्मे

धत्त व्वसवो व्वसूनि स्वाहा ॥

इदं ध्रुवाद्यष्टवसुभ्यो न मम ।

द्वादशादित्याः –

ॐ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः । आवोर्व्वाची सुमतिर्ववृत्याद(ँ)होश्चिद्या व्वरिवोव्वित्तरासत् स्वाहा ॥

इदं धात्रादिद्वादशादित्येभ्यो न मम ।

एकादशरुद्राः –

ॐ यऽएतावन्तश्च भूया(ँ)सश्च दिशो रुद्रा व्वितस्थिरे । तेषा(ँ)सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥

इदं वीरभद्राद्येकादशरुद्रेभ्यो न मम । अत्र प्रणीतोदकस्पर्शः ।

षोडशमातरः –

ॐ गौरीर्म्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी ब्बभूवुषि सहस्राक्षरा परमे व्योमन् स्वाहा ॥

इदं गौर्यादिषोडशमातृभ्यो न मम ।

अवहादिसप्तमरुतः –

ॐ मरुतो यस्य हि क्षये पाथा दिवो व्विमहसः । ससुगोपातमो जनः स्वाहा ॥

इदमावहादिसप्तमरुद्भ्यो न मम ।

विनायकादिषट् –

ॐ गणानान्त्वा गणपति(ँ)हवामहे प्प्रियाणान्त्वा प्प्रियपति(ँ)हवामहे निधीनान्त्वा निधिपति(ँ)हवामहे व्वसोमम । आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भध(ँ)स्वाहा ॥

इदं विनाकाय न मम ।

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो व्वेनऽआवः । सबुध्न्याऽउपमाऽअस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः स्वाहा ॥

इदं ब्रह्मणे न मम ।

ॐ इदं व्विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाᳫंसुरे स्वाहा ॥

इदं विष्णवे न मम ।

ॐ मानस्तोके तनये मानऽआयुषि मानो गोषु मानोऽअश्वेषु रीरिषः । मानो व्वीरान् रुद्रभामिनो व्वधीर्हविष्मन्तः सदमित्वा हवामहे स्वाहा ॥

इदं रुद्राय न मम । अत्र प्रणीतोदकस्पर्शः ।

ॐ अग्निरस्मि जन्मना जातवेदा घृतम्मे चक्षुरमृतम्मऽआसन् । अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम स्वाहा ॥

इदमर्काय न मम ।

ॐ व्वनस्पते व्वीड्वङ्गोहि भूयाऽअस्मत्सखा प्रतरणः सुवीरः । गोभिः सन्नद्धोऽअसि वीडयस्वास्थाता ते जयतु जेत्वानि स्वाहा ।

इदं वनस्पतये न मम ।

(द) विशेषकर्म[१६]

अत्र विशेषोद्देश्याभिमतं कर्म कृत्वा तत्पश्चादेव तदुत्तरं कर्म कुर्वन्ति ॥

(ध) चतुःस्वस्त्यादिहोमः

ॐ स्वस्तिनऽइन्द्रो व्वृद्धश्रवाः स्वस्तिनः पूषा व्विश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो ब्बृहस्पतिर्दधातु स्वाहा ॥

इदं चतुःस्वस्तिभ्यो न मम ।

ॐ पयः पृथिव्यां पयऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः । पयस्वतीः प्रदिशः सन्तु मह्यᳬस्वाहा ॥

इदं पयःपञ्चभ्यो न मम ।

ॐ व्विष्णोरराटमसि व्विष्णोः श्नप्त्रेस्थो व्विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि । व्वैष्णवमसि व्विष्णवे त्वा स्वाहा ॥

इदं षड्विष्णुभ्यो न मम ।

ॐ अग्निर्देवता व्वातो देवता सूर्यो देवता चन्द्रमा देवता व्वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवता व्विश्वेदेवा देवता ब्बृहस्पतिर्देवतेन्द्रो देवता व्वरुणो देवता स्वाहा ॥

इदं द्वादशदेवेभ्यो न मम ।

ॐ द्यौः शान्तिरन्तरिक्षᳬशान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । व्वनस्पतयः शान्तिर्व्विश्वेदेवाः शान्तिर्ब्ब्रह्म शान्तिः सर्वᳬशान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि स्वाहा ।

इदं द्वादशशान्तिभ्यो न मम ।

ॐ प्रातरग्निं प्रातरिन्द्रᳬहवामहे प्रातर्मित्रावरुणा प्रातरश्विना । प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रᳬहुवेम स्वाहा ॥

इदं षट्प्रातर्भ्यो न मम ।

ॐ समुद्राय त्वा व्वाताय स्वाहा सरिराय त्वा व्वाताय स्वाहा । अनाधृष्याय त्वा व्वाताय स्वाहा प्रतिधृष्याय त्वा व्वाताय स्वाहा । अवस्यवे त्वा व्वाताय स्वाहा शिमिदाय त्वा व्वाताय स्वाहा ॥

इदं षट्वातेभ्यो न मम ।

ॐ अनड्वान्वयः पङ्क्तिश्छन्दो धेनुर्वयो जगती छन्दस्त्र्यविर्वयस्त्रिष्टुप्छन्दो दित्यवाड् वयो विराट्छन्दः पञ्चाविर्वयो गायत्रीछन्दस्त्रिवत्सो वयऽउष्णिक्छन्दस्तुर्यवाड्वयोऽनुष्टुप्छन्दो लोकन्ताऽइन्द्रᳬस्वाहा ॥

इदं त्र्यनडुद्भ्यो न मम ।

ॐ भगऽएव भगवाँ२ऽअस्तु देवास्तेन वयं भगवन्तः स्याम । तन्त्वा भगः सर्व्वऽइज्जोहवीति स नो भगः पुरऽएता भवेह स्वाहा ॥

इदं पञ्चभगेभ्यो न मम ।

ॐ प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा व्वाचे स्वाहा मनसे स्वाहा ॥

इदं पञ्चेन्द्रियेभ्यो न मम ।

ॐ व्वरुणस्योत्तम्भनमसि व्वरुणस्य स्कम्भसर्जनीस्थो व्वरुणस्यऽऋतसदन्यसि व्वरुणस्यऽऋतसदनमसि व्वरुणस्यऽऋतसदनमासीद स्वाहा ॥

इदं पञ्चवरुणेभ्यो न मम ।

ॐ गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह । ब्बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तुत्वा स्वाहा ॥

इदं गायत्र्यै न मम ।

ॐ उपयामगृहीतोऽसि सावित्रोऽसि च नो धाश्चनोधाऽअसि च नो मयि धेहि । जिन्व यज्ञं जिन्व यज्ञपतिं भगाय देवायत्वा सवित्रे स्वाहा ॥

इदं सावित्र्यै न मम ।

ॐ सरस्वती योन्याङ्गर्भमन्तरश्विभ्यां पत्नी सुकृतं ब्बिभर्ति । अपाꣳरसेन व्वरुणो न साम्नेन्द्रꣳश्रियै जनयन्नप्सु राजा स्वाहा ॥

इदं सरस्वत्यै न मम ।

ॐ गृहा मा ब्बिभीत मा व्वेपध्वमूर्जं ब्बिभ्रतऽएमसि । ऊर्जं ब्बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः स्वाहा ॥

इदं गृहमात्रे न मम ।

ॐ अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्रप्रदातारन्तारिषऽऊर्जन्नो धेहि द्विपदे चतुष्पदे स्वाहा ॥

इदमन्नपूर्णायै न मम ।

ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।

इष्णन्निषाणामुम्म्ऽइषाण सर्वलोकम्म्ऽइषाण स्वाहा ॥

इदं महालक्ष्म्यै न मम ।

ॐ देवीर्द्वारऽइन्द्रꣳसङ्घाते व्वीड्वीर्यामन्नवर्धयन् । आवत्सेन तरुणेन कुमारेण च मीवता पार्व्वाणꣳरेणुककाटन्नुदन्तां व्वसुवने व्वसुधेयस्य व्यन्तु यज स्वाहा ॥

इदं महारिष्टविनाशिन्यै न मम ।

ॐ अम्बेऽअम्बिकेम्बालिके न मानयति कश्चन । ससस्त्यश्वकः सुभद्रिकाङ् काम्पीलवासिनीꣳस्वाहा ॥

इदं चण्डच्चै न मम ।

ॐ द्यौरासीत्पूर्वचित्तिरश्वऽआसीद्ब्बृहद्वयः । अविरासीत् पिलिप्पिला रात्रिरासीत् पिशङ्गिला स्वाहा ॥

इदं द्यौराल्यै न मम ।

ॐ व्वसोः पवित्रमसि शतधारं व्वसोः पवित्रमसि सहस्रधारम् । देवस्त्वा सविता पुनातु व्वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः स्वाहा ॥

इदं वास्तुदेवाय न मम ।

ॐ भूम्याऽआखूनालभतेऽन्तरिक्षाय पाङ्त्रान्दिवे कशान्दिग्भ्यो नकुलान्बभ्रूकानवान्तरदिशाभ्यः स्वाहा ॥

इदं भूमिदेवाय न मम ।

ॐ नमः शम्भवाय च मयो भवाय च नमः शङ्कराय च । मयस्कराय च नमः शिवाय च शिवतराय च स्वाहा ॥

इदं गैडुदेवाय न मम ।

ॐ यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये । यदेनश्चकृमा व्वयमिदन्तदवयजामहे स्वाहा ॥

इदं ग्रामदेवाय न मम ।

ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवे हवे सुहवꣳशूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्तिनो मघवा धात्विन्द्रः स्वाहा ॥

इदं स्वर्गेन्द्राय न मम ।

ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु । येऽअन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः स्वाहा ॥

इदं पातालवासुकिभ्यो न मम ।

ॐ मित्रोनऽएहि सुमित्रधऽइन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तꣳस्योनः स्योनम् । स्वानभ्राजाङ्घारे ब्बम्भारे हस्त सुहस्त कृशानवे ते व्वः सोमक्रयणास्तानृक्षध्वम्मा व्वो दभन् स्वाहा ॥

इदं मित्रलोकपालाय न मम ।

ॐ राजन्तमध्वराणाङ्गोपामृतस्य दीदिविम् । व्वर्धमानꣳस्वे दमे स्वाहा ॥

इदं मान्धात्रे न मम ।

ॐ ये तीर्थानि प्प्रचरन्ति सृकाहस्ता निषङ्गिणः । तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥

इदं तीर्थराजाय न मम ।

ॐ व्व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् । दक्षिणा श्श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते स्वाहा ॥

इदं व्रतराजाय न मम ।

ॐ प्राच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहार्वाच्यै दिशे स्वाहा स्वाहावाच्यै दिशे स्वाहार्वाच्यै दिशे स्वहा ।

इदं पुनर्दिक्पालेभ्यो न मम ।

ॐ अग्नेः पक्षतिर्वायोर्निपक्षतिरिन्द्रस्य तृतीया सोमस्य चतुर्थ्यदित्यै पञ्चमीन्द्राण्यै षष्ठी मरुताꣳसप्तमी बृहस्पतेरष्टम्यर्यम्णो नवमी धातुर्दशमीन्द्रस्यैकादशी व्वरुणस्य द्वादशी यमस्य त्रयोदशी स्वाहा ॥

इदं तिथिभ्यो न मम ।

ॐ नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहाहोरात्रेभ्यः स्वाहार्द्धमासेभ्यः स्वाहा मासेभ्यः स्वाहऽऋतुभ्यः स्वाहार्त्तवेभ्यः स्वाहा सँवत्सराय स्वाहा द्यावापृथिवीभ्याꣳस्वाहा चन्द्राय स्वाहा सूर्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहादित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा व्विश्वेभ्यो

देवेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा व्वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा ॥

इदं नक्षत्रेभ्यो न मम ।

ॐ योगे योगे तवस्तरं वाजे वाजे हवामहे । सखायऽइन्द्रमूतये स्वाहा ॥

इदं योगेभ्यो न मम ।

ॐ आदित्यङ्गर्ब्भम्पयसा समङ्धि सहस्रस्य प्रतिमां विश्वरूपम् । परिवृङ्धि हरसा माभिमꣳस्थाः शतायुषङ्कृणुहि चीयमानः स्वाहा ॥

इदं वारेभ्यो न मम ।

ॐ भद्रङ्कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्व्यशेमहि देवहितँ यदायुः स्वाहा ॥

इदं करणेभ्यो न मम ।

ॐ वायो ये ते सहस्रिणो रथासस्तेभिरागहि । नियुत्वान्त्सोमपीतये स्वाहा ॥

इदं वातेभ्यो न मम ।

ॐ वाताय स्वाहा धूमाय स्वाहाऽब्भ्राय स्वाहा मेघाय स्वाहा व्विद्योतमानाय स्वाहास्तनयते स्वाहावस्फूर्ज्जते स्वाहा व्वर्षते स्वाहाववर्षते स्वाहोग्रँ वर्षते स्वाहा शीघँ वर्षते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा प्रुष्णते स्वाहा शीकायते स्वाहा प्प्रुष्वाभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा नीहाराय स्वाहा ॥

इदं मेघेभ्यो न मम ।

ॐ समुद्रङ्गच्छ स्वाहान्तरिक्षङ्गच्छ स्वाहा देवꣳसवितारङ्गच्छ स्वाहा मित्राव्वरुणौ गच्छ स्याहाऽहोरात्रे गच्छ स्वाहा छन्दाꣳसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा यज्ञङ्गच्छ स्वाहा सोमङ्गच्छ स्वाहा दिव्यन्नभो गच्छ स्वाहाऽग्निं व्वैश्वानरङ्गच्छ स्वाहा मनो मे हार्दि यच्छ दिवन्ते धूमो गच्छतु स्वर्ज्योतिः पृथिवीं भस्मनाऽऽपृण स्वाहा ॥

इदं समुद्रेभ्यो न मम ।

ॐ नदीभ्यः पौञ्जिष्ठमृक्षीकाभ्यो नैषादं पुरुषव्याघ्राय दुर्मदङ्गन्धर्वाप्सरोभ्यो व्व्रात्यं प्रयुग्भ्यऽउन्मत्तꣳसर्पदेवजनेभ्योऽप्रतिपदमयेभ्यः कितवमीर्यतायाऽअकितवं पिशाचेभ्यो

व्विदलकारीं यातुधानेभ्यः कण्टकीकारीॅस्वाहा ॥

इदं नदीभ्यो न मम ।

ॐ इष्टो यज्ञो भृगुभिराशीर्दा व्वसुभिः । तस्य नऽइष्टस्य प्रीतस्य द्रविणेहागमेः स्वाहा ॥

इदमिष्टदेवाय न मम ।

ॐ कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्याः । अभित्वा रुद्रा व्वसवो गृणन्त्विमा ब्ब्रह्म पीपिहि सौभगायाश्विनाऽध्वर्षू सादयतामिह त्वा स्वाहा ॥

इदं कुलदेवाय न मम ।

यत्र स्थापितो यो देवस्तं तत्तन्मन्त्रेण होमयेत् ।

ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च स्वाहा ॥

इदं भैरवाय न मम ।

ॐ देवीर्द्वारऽइन्द्रॅसङ्घाते व्वीड्वीर्यामन्नवर्धयन् । आवत्सेन तरुणेन कुमारेण च मीवता पार्व्वाणॅरेणुककाटन्नुदन्ताँ व्वसुवने व्वसुधेयस्य व्यन्तु यज स्वाहा ॥

इदं भैरव्यै न मम ।

ॐ अम्बेऽअम्बिकेम्बालिके न मानयति कश्चन । ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीॅस्वाहा ॥

इदं विन्ध्यवासिन्यै न मम ।

यत्र स्थानविशेषाधिष्ठितो यो देवो (देवी वा) तत्तन्मन्त्रेण होमयेत् ।

ॐ एषोह देवः प्रदिशोऽनु सर्व्वाः पूर्वो ह जातः सऽउ गर्ब्भेऽअन्तः । सऽएव जातः स जनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्व्वतो मुखः स्वाहा ॥

इदं सर्वेभ्यो देवेभ्यो न मम ।

ॐशुक्रज्ज्योतिश्च चित्रज्ज्योतिश्च सत्यज्ज्योतिश्च ज्ज्योतिष्माँश्च ।शुक्रश्चऽऋतपाश्चात्यॅहाः स्वाहा ॥

इदं सर्वहोमपूरणार्थेभ्यो न मम ।

ॐ राजन्तमध्वराणाङ्गोपामृतस्य दीदिविम् । व्वर्धमानꣳस्वे दमे स्वाहा ॥

इदं पञ्चपाण्डवेभ्यो न मम ।

ॐ उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च । सासह्वाँश्चाभियुग्वा च व्विक्षिपः स्वाहा ॥

इदं भीमसेनाय न मम ।

ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन् पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वꣳस्वाहा ॥

इदं पितृभ्यो न मम । अत्र प्रणीतोदकस्पर्शः ।

ॐ ऋतावानं व्वैश्वानरमृतस्य ज्योतिषस्पतिम् । अजस्रङ्घर्म्ममीमहे । उपयामगृहीतोसि व्वैश्वानराय त्वैष ते योनिर्व्वैश्वानराय त्वा स्वाहा ॥

इदं वैश्वानराय न मम ।

ॐ वैश्वानरस्य सुमतौ स्याम राजा हि कम्भुवनानामभिश्रीः । इतो जातो व्विश्वमिदँ व्विचष्टे व्वैश्वानरो यतते सूर्येण । उपयामगृहीतोसि व्वैश्वानराय त्वैष ते योनिर्व्वैश्वानराय त्वा स्वाहा ।

इदं वैश्वानराय न मम ।

ॐ व्वैश्वानरो नऽऊतयऽआप्प्रयातु परावतः अग्निरुक्थेन व्वाहसा । उपयामगृहीतोसि व्वैश्वानराय त्वैष ते योनिर्व्वैश्वानराय त्वा स्वाहा ॥

इदं वैश्वानराय न मम ।

ॐ आकाशे यानि तीर्थानि यानि तीर्थानि भूतले ।

पाताले यानि तीर्थानि सर्वतीर्थ नमोऽस्तु ते स्वाहा ॥

ॐ आकाशे सन्ति ये देवा ये देवाः सन्ति भूतले ।

पाताले सन्ति ये देवाः सर्वदेव नमोऽस्तु ते स्वाहा ॥

ॐ आकाशे यानि लिङ्गानि यानि लिङ्गानि भूतले ।

पाताले यानि लिङ्गानि सर्वलिङ्ग नमोऽस्तु ते स्वाहा ॥

ततो हुतशेषहविर्द्रव्यं गृहीत्वा ब्रह्मणान्वारब्धः स्विष्टकृद्धोमं कुर्यात् - [१७]

ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते न मम ।

ततः संस्रवप्राशनम् ।

ततो महाव्याहृत्यादि-उत्तराङ्गहोमस्तद्यथा -

ॐ महाव्याहृतीनां प्रजापतिऋषिरग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्न्याधाने विनियोगः ।

ॐ भूः स्वाहा । इदमग्नये न मम । प्रोक्षणीपात्रेऽपि ।

ॐ भुवः स्वाहा । इदं वायवे न मम । प्रोक्षणीपात्रेऽपि ।

ॐ स्वः स्वाहा । इदं सूर्याय न मम । प्रोक्षणीपात्रेऽपि । एता महाव्याहृतयः ।

ॐ त्वन्नोऽअग्न इति वामदेवऋषिस्त्रिष्टुप्छन्द अग्नीवरुणौ देवते आज्यहोमे विनियोगः ।

ॐ त्वन्नोऽअग्ने व्वरुणस्य विद्वान् देवस्य हेडोऽअवयासिसीष्ठाः । यजिष्ठो व्वह्नितमः शोशुचानो व्विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा ॥

इदमग्नीवरुणाभ्यां न मम । प्रोक्षणीपात्रेऽपि ।

ॐ स त्वन्नोऽअग्न इति वामदेवऋषिस्त्रिष्टुप्छन्द अग्नीवरुणौ देवते आज्यहोमे विनियोगः ।

ॐ स त्वन्नोऽअग्नेवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ । अवयक्ष्व नो व्वरुणꣳरराणो व्वीहि मृडीकꣳसुहवो नऽएधि स्वाहा ।

इदमग्नीवरुणाभ्यां न मम । प्रोक्षणीपात्रेऽपि ।

ॐ अयाश्चाग्न इति वामदेवऋषिस्त्रिष्टुप्छन्द अग्निर्देवता प्रायश्चित्तहोमे विनियोगः ।

ॐ अयाश्चाग्नेऽस्यनभिशस्तिपाश्च सत्यमित्वमयाऽ असि । अया नो यज्ञँ व्वहास्ययानो धेहि भेषजꣳस्वाहा ॥

इदमग्नये न मम । प्रोक्षणीपात्रेऽपि ।

ॐ ये ते शतमिति वामदेवऋषिस्त्रिष्टुप्छन्दो वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्का देवताः प्रायश्चित्तहोमे विनियोगः ।

ॐ ये ते शतँ व्वरुणँ ये सहस्रँ यज्ञियाः पाशा व्वितता महान्तः । तेभिर्नोऽअद्य सवितोत व्विष्णुर्व्विश्वे मुञ्चन्तु मरुतः स्वर्क्काः स्वाहा ॥

इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम । प्रोक्षणीपात्रेऽपि ।

ॐ उदुत्तममिति शुनःशेप ऋषिस्त्रिष्टुप्छन्दो वरुणो देवता पाशान्मोचने विनियोगः ।

ॐ उदुत्तमँ व्वरुण पाशमस्मदवाधमं व्विमध्यमꣳश्रथाय । अथा व्वयमादित्यव्व्रते तवानागसोऽअदितये स्याम स्वाहा ॥

इदं वरुणाय न मम । प्रोक्षणीपात्रेऽपि ।

ॐ प्रजापतय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः ।

ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । (इति मनसा)

एवं होमं समाप्याग्नेः स्थापितदेवतानां चोत्तराङ्गपूजनं कार्यम् ।

ॐ अद्येत्यादि पूर्वसङ्कल्पसिद्धिरस्तु कृतस्य (अमुक)कर्मणः साङ्गतासिद्ध्यर्थं स्थापितदेवतानां मृडाग्नेश्चोत्तराङ्गपूजनं करिष्ये । इति सङ्कल्प्य गन्धाद्युपचारैः सम्पूजयेत् -

ॐ अग्नेनय सुपथा रायेऽअस्मान् व्विश्वानि देव व्वयुनानि व्विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं व्विधेम ॥

ॐ मृडाग्नये नमः १८ । ॐ स्थापितदेवताभ्यो नमः ।

अनया पूजया मृडाग्निः स्थापितदेवताश्च प्रीयन्ताम्, न मम ।

ततो होता ॐ अद्येत्यादि कृतस्यामुककर्मणः परिपूर्णतासिद्ध्यर्थं पूर्णाहुतिं होमयिष्ये । इति सङ्कल्प्य पूर्णाहुतिं होमयेत् -

ॐमूर्धानन्दिवोऽअरतिंपृथिव्यावैश्वानरमृतऽआजातमग्निम् ।कविᳬंसम्राजमतिथिञ्जनानामासन्ना पात्रञ्जनयन्त देवाः स्वाहा ॥

स्रुचश्चम इति स्रुवपूजनम् -

ॐ स्रुचश्च मे चमसाश्च मे व्वायव्यानि च मे द्रोणकलशश्च मे ग्रावाणश्चमेधिषवणे च मे पूतभृच्चमऽआधवनीयश्च मे व्वेदिश्च मे बर्हिश्च मेऽवभृथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् ॥

(न) पूर्णपात्रदानम्

रौप्यं ताम्रं मृण्मयं वा यत्सम्भवं पात्रं फलवस्त्रद्रव्यसहितं षट्पञ्चाशदधिकद्विशत(२५६)-मुष्टिपरिमितं बहुभोक्तृपुरुषाहारपरिमितं वा तण्डुलयुतं पूर्णपात्रमादाय पूर्णादर्वीति पूर्णपात्रं ब्राह्मणं च त्रिः सम्पूज्य सङ्कल्पयेत् -

ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत । व्वस्नेव व्विक्रीणावहाऽइषमूर्ज्जᳬंशतक्रतो ।

ॐ अद्येहेत्यादि अस्मिन् (अमुक)कर्माङ्गभूतहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म-प्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति सङ्कल्प्य पूर्णपात्रं ब्रह्मणे दद्यात् । ॐ स्वस्तीति प्रतिवचनम् ।

ततः प्रणीताविमोकः -

ॐ सुमित्रिया नऽआपऽओषधयः सन्तु ।

इति पवित्राभ्यां प्रणीतोदकेन कर्तुः शिरः सम्मृज्य प्रणीतापात्रमैशान्यां न्युब्जीकुर्यात् -

ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यञ्च वयन्द्विष्मः ।

ततस्तरणक्रमेणैव बर्हिरुत्थाप्य आज्येनाभिघार्य 'देवा गातुविद' इति पठित्वा हस्तेनैव होमयेत् -

ॐ देवा गातुविदो गातुँ वित्त्वा गातुमित । मनसस्पतऽइमन्देव यज्ञँ स्वाहा व्वातेधाः ॥

(प) महाबलिः –

ततो आचार्य (ब्राह्मणो वा) माषतण्डुलाद्यन्नकुङकुमादिगन्धरक्तपुष्पादियुतं सदीपं सवस्त्रं सदक्षिणं सजलं बलिं क्षेत्रपालाय दद्यात् । तत्र मन्त्रः -

ॐ क्षेत्रपालाय भूतप्रेतपिशाचराक्षसशाकिनीडाकिनी-वेतालादिपरिवारयुताय इमं बलिं समर्पयामि, भो भो क्षेत्रपाल ! इमं बलिं गृहाण, मम यजमानस्य आयुः कर्ता, क्षेमकर्ता, वरदस्तुष्टिदो भव ।

इति पठित्वा बलिं शूद्रेण ब्राह्मणेन वा चतुष्पथे विसर्जयेत् ।

तत आचार्यः प्रक्षालितपाणिपाद आचामेत् ।

(फ) यज्ञान्तगोदानम्

यजमानोऽग्नेः पश्चिमभागे प्राङ्मुख उपविश्य उदङ्मुखेभ्य आचार्यऋत्विगादिभ्यो दक्षिणां दद्यात्।

तत्रादौ गोपूजनम् -

ॐ नमो गोभ्यः श्रीमतीभ्यः सौरभेयिभ्य एव च ।

नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

ॐ इरावती धेनुमती हि भूतꣳसूयवसिनी मनवे दशस्या। व्यस्कभ्ना रोदसी व्विष्णवे ते दाधर्त्थपृथिवीमभितो मयूखैः स्वाहा ॥

इति मन्त्रद्वयेन गां त्रिः सम्पूज्य ब्राह्मणं त्रिः सम्पूजयेत् -

ॐ आ कृष्णेन रजसा व्वर्तमानो निवेशयन्नमृतं मर्त्यञ्च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥

ततः कुशजलेन गामभ्युक्ष्य गोपुच्छं गृहीत्वा पूर्वं तर्पयित्वा पश्चात् स्वशिरसि अभिषिञ्चेदनेन मन्त्रेण -

ॐ मनो मे तर्प्पयत व्वाचं मे तर्प्पयत प्राणम्मे तर्प्पयत चक्षुर्म्मे तर्प्पयत श्रोत्रम्मे तर्प्पयतात्मानं मे तर्प्पयत प्रजाम्मे तर्प्पयत पशून्मे तर्प्पयत गणान्मे तर्प्पयत गणा मे मा व्वितृषन् ॥

ततः कुशादिसहितं गोपुच्छमादाय -

ॐ तत्सत् ॐ विष्णुः ३ इत्यादि देशकालौ स्मृत्वा (अमुक) गोत्रः (अमुक) प्रवरः (अमुक) शाखान्तर्गत (अमुक) वेदाध्यायी (अमुक) शर्मा/वर्मा/गुप्तः/दासः अहं (अमुक) देवताप्रीतये (अमुक) कर्माङ्गत्वेन यथालब्धोपचारैरादौ दीपकलशगणेशादीनां पूजनपूर्वकं कृतस्य हवनकर्मणः साङ्गतासिद्धये अस्य कर्मणः षाड्गुण्यफलावाप्तये इमां गां रुद्रदैवतां तत्प्रत्याम्नायीभूतं (अमुक) द्रव्यम् (अमुकदैवतं वा) (अमुक) गोत्राय (अमुक) शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।

गोप्रार्थना -

ॐ कपिले सर्वदेवानां पूजनीयासि रोहिणि।

तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

ततो दानप्रतिष्ठार्थं कुशादिसहितं द्रव्यमादाय -

ॐ अद्य कृतैतद् (अमुक) कर्मणः साङ्गतासिद्धिद्वारा श्रीमत्परमेश्वरप्रीतये गोदानप्रतिष्ठार्थमिदं द्रव्यं रजतखण्डं चन्द्रदैवतं (ताम्रखण्डं श्रीसूर्यदैवतं, पैतलं कुजदैवतं, वानस्पत्यं द्रव्यं वनस्पतिदैवतं, सुवर्णं अग्निदैवतं वा) (अमुक) गोत्राय (अमुक) शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।

ब्राह्मणश्च - **ॐ स्वस्तीति प्रतिवचनम् ।**

ॐ कोऽदात् कस्माऽअदात् कामोऽदात् कामायादात् ।

कामो दाता कामः प्रतिग्रहीता कामैतत्ते ॥

(ब) मेधाकरणम्

घृतपूर्णस्रुवे नारिकेलपूगीफलादिकं चन्दनपुष्पाणि च निधाय घृतधारां पातयन् होमयेदेभिर्मन्त्रैः -

ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिम्मेधामयासिषꣳस्वाहा ॥

ॐ याम्मेधान्देवगणाः पितरश्चोपासते । तया मामद्यमेधयाग्ने मेधाविनङ्कुरु स्वाहा ॥

ॐ मेधाम्मे व्वरुणो ददातु मेधामग्निः प्रजापतिः । मेधामिन्द्रश्च व्वायुश्च मेधान्धाता ददातु मे स्वाहा ॥

ॐ आकूतिमग्निं प्रयुजꣳस्वाहा व्वाचो व्विधृतिमग्निम्प्रयुजꣳस्वाहा प्प्रजापतये मनवे स्वाहाग्नये वैश्वानराय स्वाहा ॥

ॐ सप्त तेऽअग्ने समिधः सप्तजिह्वाः सप्तऽऋषयः सप्तधाम प्प्रियाणि । सप्तहोत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा ॥

ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत । व्वस्नेव विक्रीणावहाऽइषमूर्ज्जꣳशतक्रतो ॥

ॐ इदम्मे ब्ब्रह्म चक्षत्रञ्चोभे श्रियमश्नुताम् । मयि देवा दधतु श्रियमुत्तमान्तस्यैते स्वाहा ॥

(भ) शेषचरुहोमः

तत्रादौ वस्त्रहोमः -

यजमानः सपरिवारो बन्धुवर्गैः सह घृताक्तवस्त्रचन्दनजलपुष्पफलचर्वादिभिरग्निं सम्पूजयेत्-

ॐ एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि । समाववर्ति पृथिवी समुषाः समुसूर्यः समु व्विश्वमिदं जगत् । व्वैश्वानरञ्ज्योतिर्ब्भूयासं विभून्कामान्व्यश्नवै भूः स्वाहा ॥

ततः शेषचरुहोमः -

ॐ अब्भ्यादधामि समिधमग्ने व्रतपते त्वयि । व्रतञ्च श्रद्धाञ्चोपैमीन्धे त्वा दीक्षितोऽअहम् ॥

ॐ यत्र ब्रह्म च क्षत्रञ्च सम्यञ्चौ चरतः सह । तँल्लोकं पुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना ॥

ॐ यत्रेन्द्रश्च वायुश्च सम्यञ्चौ चरतः सह । तँल्लोकं पुण्यं प्रज्ञेषं यत्र सेदिर्न विद्यते स्वाहा ॥

॥ इति शेषचरुहोमः ॥

ततः स्रुवेण किञ्चिद् भस्म गृहीत्वा अवशिष्टाज्येन पिष्ट्वा तत्तिलकं हस्तेन स्पृष्ट्वाभिमन्त्रयेदनेन मन्त्रेण -

ॐ अग्नये गायत्राय त्रिवृते राथन्तरायाष्टाकपालऽइन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हतायैकादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविꣳशायशाक्वराय चरुः सवित्रऽऔष्णिहाय त्रयस्त्रिꣳशाय रैवताय द्वादशकपालः प्राजापत्यश्चरुरदित्यै विष्णुपत्न्यै चरुरग्नये वैश्वानराय द्वादशकपालोनुमत्याऽअष्टाकपालः ॥

ततो यजमानस्य तिलकं कुर्यात् -

ॐ त्र्यायुषञ्जमदग्नेः । इति ललाटे ।

ॐ कश्यपस्य त्र्यायुषम् । इति ग्रीवायाम् ।

ॐ यद्देवेषु त्र्यायुषम् । इति दक्षिणबाहुमूले ।

ॐ तन्नोऽअस्तु त्र्यायुषम् । इति हृदि ।

(म) घृतच्छाया

ततो यजमानो घृते छायां निरीक्ष्य तं ब्राह्मणाय दद्यात्, तत्र क्रमः-

रौप्यपात्रे ताम्रपात्रे कांस्यपात्रे वा घृतं सुवर्णं च निधाय तेजोऽसि, ध्रुवासि इति मन्त्रद्वयं पठन्

छायाँ निरीक्षेत -

तेजोऽसीति परमेष्ठी ऋषिर्गायत्रीच्छन्दः आज्यं देवता आज्यावेक्षणे विनियोगः ।

ॐ तेजोऽसि शुक्रममृतमायुष्पाऽआयुर्म्मे पाहि । देवस्यत्वा सवितुः प्प्रसवेश्विनोर्ब्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ॥

ॐ ध्रुवासि ध्रुवोयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भ्भूयात् । घृतेन द्यावापृथिवी पूर्य्येथामिन्द्रस्यच्छदिरसि व्विश्वजनस्यच्छाया ॥

तत आज्यं स्पृष्ट्वा पठेत् -

ॐ अलक्ष्मीर्यच्च दौस्थ्यं मे सर्वगात्रेष्ववस्थितम् ।

तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्धय ॥

ॐ आज्यं तेजः समुद्दिष्टमाज्यं पापहरं शुभम् ।

आज्यं सुराणामाहारमाज्ये लोकाः प्रतिष्ठिताः ॥

ॐ नभोऽन्तरिक्षं दिव्यं वा यन्मे किल्विषमागतम् ।

सर्वं तदाज्यसंस्पर्शात् प्रणाशमुपगच्छतु ॥

ततो दूर्वां स्पृष्ट्वा पठेत् -

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि । एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥

ॐ या क्षीरसागरोत्पन्ना दूर्वा पीयूषसम्भवा ।

तत्संस्पर्शनमात्रेण ह्यायुर्वृद्धिर्यशोबलम् ॥

ततस्तदाज्यपात्रं कुशतिलजलसहितमादाय -

ॐ अद्येहेत्यादि मम दुःस्वप्नदुर्निमित्तादिसर्वारिष्टोपशमनपूर्वकम् असमानतेजःप्रज्ञाशौर्य-यशोबलायुर्लक्ष्मीपुष्टिवर्धनार्थमिदमाज्यं मृत्युञ्जयदैवतं कांस्यपात्रं (रौप्यं ताम्रं वा) चन्द्रदैवतं सुवर्णमग्निदैवतं (अमुक) गोत्राय (अमुक) शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । ॐ तत्सन्न मम ।

प्रार्थना -

ॐ कामधेनोः समुद्भूतं देवानामुत्तमं हविः ।

आयुर्वृद्धिकरं दातॄ राज्यं पातु सदैव माम् ।

ततो महामृत्युञ्जयः प्रीयतामिति संप्रार्थ्य दानप्रतिष्ठां दद्यात् ।

(य) भूयसीदक्षिणा विसर्जनं च

तत्रादौ भूयसीदक्षिणादानम् -

ॐ हिरण्यगर्ब्भगर्ब्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।

इति देयं ब्राह्मणं च त्रिः सम्पूज्य कुशादिसहितं दक्षिणाद्रव्यमादाय -

हरिः ॐ तत्सद्विष्णुरित्यादि पूर्वसङ्कल्पमुच्चार्य (अमुक) गोत्रः (अमुक) शर्माहं कृतस्यामुककर्मणो अमुकदेवताप्रीतये कृतस्य देवतापूजनहवनादिकर्मणः न्यूनातिरिक्ततापरिपूर्तिपूर्वकं यथोक्तफलप्राप्त्यर्थमिदं दक्षिणाद्रव्यम् (अमुक) दैवतं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च यथायोग्यभागं विभज्य यथाकाले दातुमहमुत्सृजे । इति जले उत्सृजेत् ।

सिद्धान्नदानम् (आमान्नदानं वा)

ॐ अद्येहामुकगोत्रोऽमुकशर्माहं कृतस्य (अमुक) कर्मणो यथावत्फलप्राप्तये नानानामगोत्रान् नानानामशर्मणो ब्राह्मणान् यथोपपन्नेनान्नेन भोजयिष्ये (आमान्नपक्षे-सन्तोषयिष्ये) ।

ततो विसर्जनम्

ततः कर्ता देवायार्घ्यं निवेद्य बन्धुवर्गैर्ब्राह्मणैश्च सह यज्ञे देवेषु च पुष्पाक्षताः क्षिपन् यानि कानीति मन्त्रेण यज्ञप्रदक्षिणां कृत्वा नमस्कुर्यात् -

ॐ यानि कानि च पापानि जन्मान्तरकृतानि च । तानि तानि प्रणश्यन्तु प्रदक्षिणपदे पदे ॥

ततः पुष्पाक्षतैः ब्रह्माणं सम्पूज्य 'उत्तिष्ठ ब्रह्मणस्पते' इति विसृज्य उत्थापयेत् -

ॐ उत्तिष्ठ ब्ब्रह्मणस्पते देवयन्तस्त्वेमहे । उपप्रयन्तु मरुतः सुदानवऽइन्द्रप्प्राशूर्भवा सचा ॥

ततो यान्तु देवेति पुष्पाक्षतैरभ्यर्च्य देवान् विसर्जयेत् -

ॐ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ।

इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥

ॐ गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर ।

यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥

ॐ आवाहनं न जानामि न जानामि विसर्जनम् ॥

पूजां चैव नजानामि क्षमस्व परमेश्वर ॥

ततः कर्मपात्रावशिष्टजलादिकमादाय -

ॐ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतिस्वभावात् ।

करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पये तत् ॥

ततो यस्य स्मृत्येति अच्युतं नमस्कुर्यात् -

ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।

न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

ॐ अच्युताय नमः । ॐ अच्युताय नमः । ॐ अच्युताय नमः ।

ॐ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।

हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥

ॐ विष्णवे नमः । ॐ विष्णवे नमः । ॐ विष्णवे नमः ।

(र) अभिषेकः प्रसादग्रहणञ्च

आचार्यादयो ब्राह्मणाः शान्तिकलशोदकेन पौराणिकैर्वैदिकैश्च मन्त्रैर्यजमानस्याभिषेकं कुर्युः । तत्रादौ पौराणिका मन्त्राः -

ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।

वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः ॥१॥

प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ।

आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा ॥२॥

वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।

बृह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा ॥३॥

कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ॥

बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ॥४॥

पञ्चदेवाश्च योगाश्च करणानि च वासशः ।

एतास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ॥ ५ ॥

देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥

ऋषयो मनवो गावो देवमातर एव च ॥ ६ ॥

देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसो गणाः ।

अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥ ७ ॥

औषधानि च रत्नानि कालस्यावयवाश्च ये ।

सरितः सागराः शैलास्तीर्थानि जलदा नदाः ॥८ ॥

विश्वब्रह्माण्डदेवाश्च सलोकाः सचराचराः ॥

एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥ ९ ॥

॥ इति पौराणिका मन्त्राः ॥

वैदिका मन्त्राः –

ॐ देवस्यत्वा सवितुः प्प्रसवेश्विनोर्ब्बाहुभ्यां पूष्णो हस्ताभ्याम् । अश्विनोर्भैषज्येन तेजसे ब्ब्रह्मवर्च्चसायाभिषिञ्चामि सरस्वत्यै भैषज्ज्येन व्वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण ब्बलाय श्रियै यशसेऽभिषिञ्चामि ॥

ॐ कोऽसि कतमोऽसि कस्मै त्वा काय त्वा । सुश्लोक सुमङ्गल सत्यराजन् ॥

ॐ शिरो मे श्रीर्यशो मुखन्त्विषिः केशाश्च श्मश्रूणि । राजा मे प्राणोऽअमृतꣳसम्राट् चक्षुर्व्विराट् श्रोत्रम् ॥

ॐ जिह्वा मे भद्रँ वाङ्महो मनो मन्युः स्वराड् भाम । मोदाः प्रमोदाऽअङ्गुलीरङ्गानि मित्रम्मे सहः ॥

ॐ ब्बाहू मे ब्बलमिन्द्रियꣳहस्तौ मे कर्म व्वीर्यम् । आत्मा क्षत्रमुरो मम ॥

ॐ पृष्टीर्म्मे राष्ट्रमुदरमꣳसौ ग्रीवाश्च श्रोणी । ऊरुऽअरत्नी जानुनी व्विशो मेऽङ्गानि सर्वतः ॥

ॐ नाभिर्म्मे चित्तँ व्विज्ञानं पायुर्म्मेऽपचित्तिर्भसत् । आनन्दनन्दावाण्डौ मे भगः सौभाग्यं पसः । जङ्घाभ्यां पद्भ्यां धर्मोऽस्मि व्विशि राजा प्रतिष्ठितः ॥

ॐ प्रतिक्षत्रे प्रतितिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रतितिष्ठामि गोषु । प्रत्यङ्गेषु प्रतितिष्ठाम्यात्मन् प्रतिप्राणेषु प्रतितिष्ठामि पुष्टे प्रतिद्यावापृथिव्योः प्रतितिष्ठामि यज्ञे ॥

ॐ त्रया देवाऽएकादश त्रयस्त्रिꣳशाः सुराधसः बृहस्पति पुरोहिता देवस्य सवितुः सवे । देवा देवैरवन्तु मा ॥

ॐ प्रथमा द्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः सत्येन सत्यं यज्ञेन यज्ञो यजुर्भिर्यजूꣳषि सामभिः सामान्यृग्भिर्ऋचः पुरोऽनुवाक्याभिः पुरोऽनुवाक्या याज्याभिर्याज्या व्वषट्कारैर्वषट् काराऽआहुतिभिराहुतयो मे कामान्त्समर्धयन्तु भूः स्वाहा ॥

ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । व्वनस्पतयः शान्तिर्व्विश्वेदेवाः शान्तिर्ब्ब्रह्म शान्तिः सर्व्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतञ्जीवेम शरदः शतꣳशृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात् ॥

ॐ स्वस्ति नऽइन्द्रो व्वृद्धश्रवाः स्वस्ति नः पूषा व्विश्ववेदाः । स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो ब्बृहस्पतिर्दधातु ॥

ॐ व्विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रन्तन्नऽआसुव ॥

ॐ यथेमां व्वाचङ्कल्याणीमावदानि जनेभ्यः । ब्रह्मराजन्याभ्याꣳशूद्राय चार्याय च स्वाय चारणाय च । प्प्रियो देवानान्दक्षिणायै दातुरिह भूयासमयम्मे कामः समृद्ध्यतामुपमादो नमतु ॥ ॥

इत्यभिषेकः ॥

प्रसादग्रहणम् –

तत आचार्यादयो हस्ते प्रसादादिकं गृहीत्वा 'आब्रह्मन्' इत्याद्याशीर्वादमन्त्रान् पठेयुः -

ॐ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्च्चसी जायतामाराष्ट्रे राजन्यः शूरऽइषव्योतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्व्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य व्वीरो जायतान्निकामे निकामे नः पर्ज्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥

ॐ दीर्घायुस्तऽओषधे खनिता यस्मै च त्वा खनाम्यहम्। अथोत्वन्दीर्घायुर्भूत्वा शतवल्शा व्विरोहतात् ॥

ॐ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो व्वसुनीथ यज्ञैः। घृतेन त्वन्तन्वं व्वर्द्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥

ॐ मनसः काममाकूतिं व्वाचः सत्यमशीय। पशूनाꣳरूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥

ॐ आयुष्यं वर्च्चस्यꣳरायस्पोषमौद्भिदम्। इदꣳहिरण्यं व्वर्च्चस्वं जैत्रायाविशतादुमाम् ॥

ॐ न तद्रक्षाꣳसि न पिशाचास्तरन्ति देवानामोजः प्रथमजꣳह्येतत्। यो बिभर्ति दाक्षायणꣳहिरण्यꣳस देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥

रक्षाबन्धनम् –

ॐ येन बद्धो बली राजा दानवेन्द्रो महाबलः ॥ तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल ॥

ॐ त्वँ यविष्ठ दाशुषो नॄँः पाहि शृणुधी गिरः ॥ रक्षा तोकमुत्त्मना ॥

आशीर्वादः –

ॐ स्वस्त्यस्तु ते कुशलमस्तु चिरायुरस्तु, गोवाजिहस्तिधनधान्यसमृद्धिरस्तु।

ऐश्वर्य्यमस्तु विजयोऽस्तु रिपुक्षयोऽस्तु, सन्तानवृद्धिसहिता हरिभक्तिरस्तु ॥

इत्याशीर्वादपुरःसरं ब्राह्मणहस्तेन प्रसादादिकं गृहीत्वा ब्राह्मणान् भोजयित्वा स्वयमपि सुहृद्युक्तो भुञ्जीत।

॥ इत्यग्निस्थापनविधिः ॥